[illegible] इ[illegible]ति

[illegible]

प. सं. २-५२

1

श्रीमते रामानुजाय नमः ॐ नमस्सच्चिदानन्दरूपिणे दृष्टानिरुद्धवृत्तिं तु वृद्धसांख्योपसिद्धान्तैर्विरच्यते वृत्तिसारं वेदान्त्यादि
महादेवः २ अथ जगदुद्दिधीर्षुः परममहामुनिः कपिलः फलसौंदर्यज्ञानस्य फले श्रद्धाद्वारा साधनप्रवृत्तौ कारणत्वं पश्यन् फ
लसौंदर्यमाह अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः २ अथशब्दो मंगलार्थः त्रिविधस्य दुःखस्याध्यात्मि
काधिभौतिकाधिदैविकरूपस्यात्यन्तनिवृत्तिः पुनर्दुःखजातीयानुत्पत्तिविशिष्टा निवृत्तिरत्यन्तपुरुषार्थः धर्मार्थका
ममोक्षेषु चतुर्षु पुरुषार्थेषु मध्ये श्रेष्ठः पुरुषार्थ इत्यर्थः त्रयाणां ह्यपि तेषां मोक्षस्यान्ते निवृत्तिरूपस्यापेक्षिता
दिति भावः तत्राध्यात्मिकं दुःखं शारीरं मानसं च शारीरं वातपित्तश्लेष्मवैषम्यनिमित्तं मानसं कामक्रोधलोभ
मोहेर्ष्यादिजनितं उभयमप्यान्तरोपायसाध्यत्वादाध्यात्मिकत्वं अताभ्यान्तरमिदमित्याचक्षते आधिभौ
तिकं पशुपक्षिस्थावरादिनिमित्तं आधिदैविकं ग्रहादिनिमित्तं द्विविधमिदं बाह्यमित्याचक्षते नन्वस्त्वत्यन्तनिव
त्तिरत्यन्तपुरुषार्थः तथापि सत्त्वपुरुषान्यताख्यातिरूपतत्त्वज्ञानहेतुशास्त्रप्रवृत्तौ को हेतुः शारीरदुःखनिवर्तकाना
मौषध्यादीनां मानसदुःखनिवर्तकानां वरस्त्रीपानादीनां च आधिभौतिकदुःखनिवर्तकानां नीतिशास्त्रोपदि
ष्टनिरत्ययस्थानाध्यासनादीनां आधिदैविकदुःखनिवर्तकानां मणिमन्त्रमहौषधादीनां च सुकराणां सत्त्वे
नेकजन्मपरंपरायाससाध्यतत्त्वज्ञाने तिदुष्करे प्रवृत्तेर्दुर्लभत्वेन शास्त्रप्रवृत्तेर्दुर्लभतरत्वादत आह नदृष्टात्त

सां०सू०

२ त्वेनोत्कर्षात् आत्मत्वानात्मपरं विधत्त इति सर्वोत्कर्षश्रुतेरपि तत्साधनेन तत्त्वज्ञानस्यावश्यकत्वं ननु मोक्ष
स्य दुःखबंधादिति प्रतीयते स च बंधः किं स्वाभाविक उतागन्तुकः आद्ये नाशायोगः अन्त्ये स्वतस्त्वं नश्यतीति किं
तत्त्वज्ञानेनेत्यत आह। अविशेषश्चोभयोः ६ बंधस्य स्वाभाविकागन्तुकत्वयोर्मोक्षस्योपादेयत्वे विशेषः
पर्यायं च स्योपपत्तिर्यथा च मोक्षस्य तथा बंधस्यापि वक्तुं शक्यमित्यर्थः अथ बंधमोक्षयोरुपपत्त्यर्थं आदौ तावत्स्वा
भाविकत्वं बंधस्य दूषयन्नाह न स्वभावतो बद्धस्य मोक्षसाधनोपदेशविधिः ७ दुःखात्यन्तनिवृ
२ त्तेर्मोक्ष [illegible] त्वस्योक्तत्वात् बंधो दुःखयोगः स च पुरुषे न स्वाभाविकः तथा सति मोक्षस्य साध
नोपदेशस्याप्रामाण्यं तस्य च विधिरनुष्ठानं न घटत इति शेषः न ह्यत्र स्वाभाविकादोषस्य नाशः संभव
३ ति स्वाभाविकस्य यावद्द्रव्यभावित्वादिति भावः उक्तं चेश्वरगीतायां यथा मामलिनो स्वच्छो विकारस्या
स्वभावतः। न हि तस्य भवेन्मुक्तिर्जन्मान्तरशतैरपि। भवत्वननुष्ठानं किमेतावतेत्यत आह। स्वभाव
स्यानपायित्वादननुष्ठानलक्षणमप्रामाण्यं ८ अननुष्ठानलक्षणमप्रामाण्यं दोषोऽप्येवेति भावः ननु।
शक्तित्वादेवानुष्ठानं किं न स्यात्तत्राह॥ नाशक्योपदेशविधिरुपदिष्टेऽप्यनुपदेशः ९ अशक्योप राम

दी२ प१

सिद्धिर्निवृत्तेरप्यनुवृत्तिदर्शनात् २ दृष्टाद्धनौषधादिरूपात्तत्सिद्धिर्दुःखात्यन्तनिवृत्तिसिद्धिर्न भवति कुतो निवृ
त्ते दुःखनिवृत्तेरनन्तरमिति शेषः अनुवृत्तिदर्शनादपि दुःखजातीयोत्पत्तिदर्शनादपि अयं भावः नौन्तैरुपायैर्दुः
खानुत्पत्तिविशिष्टा दुःखनिवृत्तिर्भवति तत्तदुपायैस्तत्तद्दुःखे पुनष्टेऽपि [illegible] दुःखान्तरोत्पत्तिदर्शनात् तस्मा
दस्तुकरत्वेऽपि तत्त्वज्ञानमेषितव्यमिति ननु मा भूदौषधादिभिः पूर्वैर्भाविदुःखनिवृत्तिः [illegible] तथापि पुनः पुनः प्र
तीकारकरणे तु भाविदुःखनिवृत्तिरपि स्यादिति शंकते प्रात्यहिकक्षुत्प्रतीकारवत्तत्प्रतीकारचेष्टनात् ३ य
दा दुःखमुत्पत्स्यते तदा तत्प्रतिकर्तव्यं तथा च दुःखनिवृत्तिः पुरुषार्थः यथा यदा क्षुत्तदा भोक्तव्यं भुंजानस्य दु
निवृत्तिः पुरुषार्थ इति सिद्धान्तयति सर्वासंभवात्संभवेऽपि सत्तासंभवाद्धेयः प्रमाणकुशलैः ४ नहि सर्वस्मि
न्देशे सर्वस्मिन्काले वैद्यौदयः सन्ति संभवेऽपि सत्वेऽपि वैद्यादीनां सत्तासंभवात् दुःखसत्तासंभवात् नहि वै
धा द्यादिभिरपि अवश्यमौषधदानाद्दुःखं हातुं शक्यते किंच शारीरादिदुःखापगमेऽपि मानसादेस्तस्य संभव इति
३ न सर्वथा दुःखविमोकस्तस्मात्प्रमाणकुशलैरहेयि धः पुरुषार्थो हेयः। कृतार्थत्वमाह उत्कर्षादपि मो
क्षस्य सर्वोत्कर्षश्रुतेः ५ नैतैस्तैरुपायैस्तत्तद्दुःखोच्छेदे यतितव्यं मोक्षस्य नित्यत्वेन सर्वदुःखोच्छेदरूप

स्यनिमित्तत्वेपिसहकार्यंतरसंभवासंभवाभ्यांभावस्यास्यादितिचेत् एवंमन्यते यत्संयोगेसत्यवश्यंवं
धस्तत्रैवसहकारित्वाल्लाघवाद्बंधोयुक्तः पुरुषेबंधव्यवहारस्यावाधकत्वेनाप्युपपत्तेरिति कथंका
लनिमित्तकत्वमिति॰ नदेशयोगतोप्यस्मात् १३ अस्मात्पूर्वसूत्रोक्तात्कालस्येवदेशस्यापिसर्व
पुरुषसर्वकालसाधारण्यमितिभावः नावस्थातोदेहधर्मत्वात्तस्याः १४ अवस्थासंघातविशेषरू
पताततोनबंधः तस्याः देहधर्मत्वात् अचेतनधर्मत्वात् अन्यधर्मस्यान्यबंधकत्वेमुक्तस्यापिबंधापत्तेः
3 ननुपुरुषस्यैवावस्थास्तुतत्राह असंगोयंपुरुषइति १५ इतिहेतौ॰ पुरुषस्यासंगत्वादित्यर्थः नकर्म
णान्यधर्मत्वादतिप्रसक्तेश्च १६ नविहितनिषिद्धकर्मणापिपुरुषस्यबंधः कर्मणोन्यधर्मत्वात् चि
त्तधर्मस्यत्वमेवास्तुकिमितिपुरुषेपिबंधः कल्प्यतइत्याशंक्याह विचित्रभोगानुपपत्तिरन्यधर्मत्वे १७
दुःखयोगरूपबंधस्यपुरुषेऽभावेकश्चिदेवदुःखभोक्ताकश्चिन्नेतिविचित्रभोगानुपपत्तिरतः पुरु
षेपिदुःखयोगः स्वीकार्यः सचदुःखप्रतिबिंबरूपएव॰ प्रतिबिंबश्चस्वोपाधेरेवभवति तेनातिप्रसंगः चित्तस्यै
वबंधइतितुचित्तस्यदुःखसंबंधमादायबोध्यं॰ साक्षात्प्रकृतिनिमित्तकत्वंबंधस्याशंकरोति॰ प्रकृतिनिबंधना
च्चेन्नतस्याअपिपारतंत्र्ये १८ प्रकृतिनिमित्तोबंधोभवत्वितिचेन्न॰ यतस्तस्याअपिप्रकृतेरपिउत्तरसूत्रवक्ष्य राम

फलायोपदेशस्यानुष्ठानं न संभवति यत्तु उपदिष्टेऽपि विहितेष्वशक्योपाये सोऽनुपदेश एवोपदेशाभास एव
म बाधितं श्रुवेदोपि न बोधयतीति न्यायात् तस्मान्न स्वभावतो बद्धः अत्र शंकते शुक्लपटवद्बीजवच्चेत् १० स्वाभा
विकस्याप्यपायो दृश्यते यथा शुक्लपटस्य स्वाभाविकं शौक्ल्यं रागद्रव्येणापनीयते यथा वा बीजस्य स्वाभावि
काप्यंकुरशक्तिरग्निनेति चेत् समाधत्ते। शक्त्युद्भवानुद्भवाभ्यां नाशक्योपदेशः ११ उक्तदृष्टान्तयो।
रप्यशक्यस्य स्वाभाविकापायस्योपदेशो लौकिकानां न भवति कुतः शक्त्युद्भवानुद्भवाभ्यां। दृष्टान्तद्व
येशुक्लत्वादेराविर्भावतिरोभावावेव न तु शौक्ल्यस्यांकुरशक्तेश्चापायः। रजकादिव्यापारैर्योगिसंकल्पा
दिना च रक्तपटभृष्टबीजयोः पुनः शौक्ल्यस्यांकुरशक्तेश्चाविर्भावादिति भावः नचैवं पुरुषेऽपि दुःख
शक्तितिरोभाव एव मोक्षोऽस्त्विति वाच्यं। दुःखात्यन्तनिवृत्तेरेव मोक्षत्वेन पुरुषार्थत्वोक्तेः एवं बन्ध
स्य स्वाभाविकत्वं निराकृत्य नैमित्तिकत्वमपि निराकरिष्यन् निमित्तानि कालादीनि निराकरोति न काल सा ३
योगतो व्यापिनो नित्यस्य सर्वसंबंधात् १२ न कालसंबंधनिमित्तकः पुरुषस्य बंधो व्यापिनो नि।
त्यस्य कालस्य सर्वैः पुरुषैः सर्वकालावच्छेदेन संबंधात् मुक्तामुक्तव्यवस्थानुपपत्तेः ननु काल

ख्यः। आत्मन उक्तरूपत्वं श्रुतिस्मृत्यादिप्रसिद्धमेव। एवमेवार्थं पतंजलिना सूत्र्यते। द्रष्टृदृश्ययोः संयोगो हेयहेतु
रिति। नन्वेवं कालादिवत्प्रकृतिसंयोगस्याप्यमुक्तामुक्तपुरुषसाधारणतया कथं बंधहेतुत्वमिति चेन्न। ज्ञन्माप
रनाम्नः स्वत्वबुद्धिनाम्नो वापन्नप्रकृतिसंयोगविशेषस्यैवात्र संयोगशब्दार्थत्वात्। योगभाष्ये व्यासदेवेनैवं व्याख्या
तत्वात् बुद्धिवत्पुरुषेणैव भुक्तस्य दुःखयोगात् वैशेषिकादिनामिव भोगजनकतावच्छेदकत्वेनान्तःक
रणसंयोगे वैजात्यं चास्माकमपीष्टं। तेन न सुषुप्त्यादौ बंधप्रसंगः। स्वत्वं च स्वभुक्तिवृत्तिवासनावत्त्वं। वृत्तिः
4 तत्संस्कारप्रवाहोत्पन्नादिस्तेन स्वस्वामिभावेन व्यवस्थेति दिक्। कश्चित्तु। प्रकृतिपुरुषयोः संयोगं जिका
रे पुरुषस्य परिणामसंज्ञो प्रज्ञेयतो अतोत्रा विवेकरूपयोगशब्दार्थो न तु संयोग इत्याह तन्न। तस्य योगस्य
विवेकादिति सूत्रेणाविवेकस्य योगहेतुताया एव सूत्रकारेणावक्ष्यमाणत्वात्। किंच विवेकाभावरूपस्या
विवेकस्य संयोगत्वे प्रलयादावपि प्रकृतिपुरुषसंयोगसत्वेन भोगापत्तिः। मिथ्याज्ञानरूपस्यावि
वेकस्य संयोगत्वे चात्माश्रयः प्रकृतिसंयोगस्य ज्ञानादिहेतुत्वादिति। तस्मादविवेकातिरिक्तो योगो वक्त
व्यः। स च संयोग एवान्यस्याप्रामाणिकत्वात्। संयोगश्च न परिणामः सामान्यगुणातिरिक्तधर्मोत्पत्तेरेव

ये २

मायासंयोगपारतंत्र्यं । तेन विनापि बंधकल्पने प्रलयादावपि बंधप्रसंगात् । निबंधनादिति पाठे प्रकृतिनिबंधना
बद्धताथेदितियोज्यं । अयमपरतंत्रा प्रकृतिर्बंधकारणं तस्मादेव संयोगविशेषादौपाधिको बंधोऽग्निसं-
योगाज्जलौष्ण्यवदिति सिद्धान्तः प्रसंगेनान्तराल एवावधारयति न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्यो-
गस्तद्योगादृते १९ । न तद्योगादृते प्रकृतिसंयोगं विना तद्योगः बंधसंपर्को न पुरुषस्येति शेषः बंध- ये ४
स्यौपाधिकत्वलाभाय परकोक्तिः । यदि बंधः प्रकृतिसंयोगजन्यः स्यात्तर्हि वाक्यजस्य समष्टि वियोगाद-
वप्रकृतिवियोगेप्यनुवर्तेत । अतश्च प्रकृतिवियोगे बंधाभावादौपाधिक एव बंधो न तु स्वाभाविको
नैमित्तिको वेति सिद्धान्तरहस्यं । एवं च संयोगनिवृत्तिरेव साक्षाद्बंधहानोपाय इत्यप्युक्तं भवति स्मृति-
श्च यथा ज्वलनः हारिलिंगं दृश्यते । तथा सदोषप्रकृतौ छिन्नोपनशा चतिरतिवेशोधिका वि ५
र्थमिव पारमार्थिको दुःखयोगो मा भूदिति वक्तुं पुरुषविशेषणं । नित्यत्वादि । यथा स्वभावस्वच्छस्य स्फ-
टिकस्य रागयोगो न जपायोगं विना घटते यथा केवलोऽरक्तः स्फटिको लक्ष्यते जनैः रंजकाद्युपधा-
नेन तद्वत्परमपुरुष इति । तत्र नित्यशुद्धत्वं सदा पापपुण्यशून्यत्वं । नित्यबुद्धत्वमलुप्तचिद्रूपत्वं नि-
त्यमुक्तत्वं सदा पारमार्थिकदुःखायुक्तत्वं प्रतिबिंबरूपदुःखयोगस्तु अपारमार्थिकोऽस्त्येवेति भा-
वः तेन नित्यशुद्धादिस्वाभाविकस्य पुरुषस्यौपाधिकसंयोगं विना दुःखसंबंधो न घटते स्वतो दुःखस्यासंभवात् । अतश्चोक्तं सौरे ०३

सां॰२०
५

तर्थपि भावाभावविं। येन बुद्धिर्विरुद्धस्य सदसदात्मकवदार्थस्पर्शं ग्राह्ये भवद्वेन न मात्रा। क्षिप्यमाणानां न संभवति
अन्यथा बालोन्मत्तादयुक्तस्याप्येति। कस्य संग्रहः स्यादित्यर्थः। सुप्तौ कंपानं चात्र नास्ति तस्यान्यथासिद्धिरिति भा टि२
वः। केचिन्नास्तिका आहुः। सन्ति बाह्या विषयाः क्षणिकास्तेषां वासनया जीवस्य बंध इति तद्दूषयति। नानादिवि
षयोपरागनिमित्तोप्यस्य ॥२७॥ अस्य पुरुषस्य प्रवाहरूपेणानादिकार्यापि विषयवासनात्तन्निमित्तकोपि बंधो
न संभवति। निमित्ततोप्यस्येति पाठस्तु सुगमः। कुत इत्याह। न बाह्यान्तरयोरुपरज्योपरंजकभावोपि देशव्यव क
धानात् स्रुघ्नस्थपाटलिपुत्रस्थयोरिव ॥२८॥ तन्मते हि परिच्छिन्नो देहान्तरस्थ एवात्मा तस्याभ्यन्तरस्य न बा
5 ह्यविषयेण सहोपरज्योपरंजकभावोपि संभवति कुतः स्रुघ्नस्थपाटलिपुत्रयोरिव देशव्यवधानात्। संयो
गस्थले वहिर्वासनारूप उपरागो दृष्टः। यथा मंजिष्ठावस्त्रयोः यथा वा पुष्पस्फटिकयोः। अपि नास्त्वम
तेपि संयोगाभावः समुच्चीयते। ननु इंद्रियाणामिवात्मनो विषयदेशगमनाद्विषयसंयोगेन [illegible] विष
योपरागः स्यात्तत्राह। द्वयोरेकदेशलब्धोपरागान्न व्यवस्था ॥२९॥ एकस्मिन्विषयदेशे संयोगेन लब्धादुप
रागाद्बंधो न संभवतीति शेषः। कुतो यस्माद्द्वयोः बद्धमुक्तात्मनोर्न व्यवस्था। आत्मनो गमनसंयोगांगी
कारे मुक्तस्यापि बंधापत्तिरित्यर्थः। अत्र शंकते। अदृष्टवशाच्चेत् ॥३०॥ विषयसंयोगसाम्येप्यदृष्टवशाद राम

परिणामित्वव्यवहारात्। अन्यथा कूटस्थस्य सर्वगतत्वस्वरूपविच्युत्यानुपपत्तेः। नापि संयोगमात्रं संगः परिणामहेतुः संयो-
गस्यैव संगशब्दार्थत्वात्। पद्मपत्रस्य जलेन पत्रासंगतायाः पुरुषासंगतायां दृष्टान्तत्वेन संगशब्दस्यैवम-
र्थत्वनिर्णयात्। तस्मात्संयोगविशेष एवात्र बंधाख्यः हेयहेतुतया सूत्रकृदभिप्रेत इति गम्यते इत्यलं। इदानीम-
न्याभिप्रेतान् बंधहेतून्निरस्यति। नाविद्यातोऽप्यवस्तुना बंधायोगात् २०। अद्वैतवादिनामविद्यायाः अवस्तु-
त्वेन तया बंधानुपपत्तिः नहि स्वाप्नरज्ज्वा बंधनं दृष्टं। अविद्याया वस्तुत्वे त्वाह। वस्तुत्वे सिद्धान्तहानिः स्यात्
विजातीयद्वैतापत्तिश्च २२ तर्हि सजातीयविजातीयद्वैताभावः स्यादिति शंकते विरुद्धोभयरूपा चेत् २३ अवि-
द्या न सतीति न विजातीयद्वैतापत्तिः। नाप्यसती कार्यफलं स्यात्। किंतु सदसद्रूपेति चेत्। न तादृक्पदार्थाप्र-
तीतेः २४ विवादास्पदे हि वस्तुनि दृष्टान्त आवश्यक इति भावः। किंच अविद्यायाः साक्षादेव दुःखभोगाख्यबंध-
हेतुत्वे ज्ञानेनाविद्याक्षयानंतरं प्रारब्धभोगानुपपत्तिः बंधस्य कारणनाशात्। सिद्धान्ते तु प्रकृतेः। न वयं
षट्पदार्थवादिनो वैशेषिकादिवत् २५। न वयं नियतपदार्थवादिनः। अतो अप्रतीतोऽपि सदसदात्मकः सद-
सद्विलक्षणो वाऽविद्यापदार्थ इत्यंगीकुर्मः। मानसिद्धत्वात्। आदिपदान्नैयायिकः। स हि षोडशपदार्थवा-
दी परिहरति अनियतत्वेऽपि नायौक्तिकस्य संग्रहोऽन्यथा बालोन्मत्तादिसमत्वं २६। पदार्थनियमो मास्तु

संयोगद्वारैव बंधहेतुत्वात् जन्माख्यस्य च संयोगस्य प्रारब्धसमाप्तिं विना न नाश इति न दोषः पुनः शंकते ७

सा०२०

६

मि

कारणत्वायोगात् क्षणिकत्वस्य श्रुतियुक्तिविरुद्धत्वात्। दृष्टान्तासिद्धेश्च ॥३७॥ दृष्टान्ते दीपादौ क्षणि-
कत्वस्यासिद्धेः स्थूलस्यानेकक्षणानां कालेन क्षणिकत्वमभ्युपगम्य तत्र न वर्तत इति भावः। किं च क्षणिकत्वा-
देरदृष्टादिस्थले कार्यकारणभावेनाथवा चेत् न च नास्त्येव स इति वाच्यं। कार्यार्थिनः प्रवृत्त्यन्यथा-
कार्य ४ नुपपत्त्या तत्सिद्धेरित्यभिप्रेत्याह। युगपज्जायमानयोर्न कारणभावः ॥३८॥ किंच दण्डघटयोर्युगपज्जायमा-
नयोः कार्यकारणभावः किंवा क्रमिकयोः नाद्यः विनिगमकाभावात्। द्वितीये घटार्थिनो मृदादिप्रवृत्त्यनु-
पपत्तेश्च नान्त्य इत्याह। पूर्वापाये उत्तरायोगात् ॥३९॥ पूर्वस्य कारणस्यापायकाले उत्तरस्य कार्यस्यायोगा-
6 त्। उपादानकारणानुगततयैव हि कार्यानुभवः स च क्षणिकत्ववादे न संभवति। तद्भावे तदयो-
गादुभयव्यभिचारादपि न ॥४०॥ पूर्वस्य भावकाले उत्तरस्यासंबन्धात्। उभयव्यभिचारादपि न कार्यका-
रणभाव इति शेषः। यदा उपादेयं तदोपादानं। यदोपादानाभावस्तदोपादेयाभाव इत्यन्वयव्यति-
रेकौ हि उपादेयोपादानयोः कार्यकारणभावग्राहकौ तौ च क्षणिकत्वेन क्रमिकयोस्तयोर्विरुद्ध-
कालत्वान्न संभवः। ननु निमित्तकारणस्येवोपादानस्यापि पूर्वभावमात्रेणैव कारणतास्तु तत्राह।
पूर्वभावमात्रे न नियमः ॥४१॥ न नियम इति इदमेवोपादानमिति न नियमः स्यात्। निमित्तकारणाना-
मपि पूर्वभावविशेषात्। इदमेव हि निमित्तोपादानयोर्विभागो लोकसिद्धः ॥ प्रथविज्ञानातिरिक्त

श्रीरा

६

वोपरागत्वं भवतीति चेत्। न द्वयोरेककालत्वायोगादुपकार्योपकारकभावः ३२ तव मते कर्तृभोक्त्रोर्भेदात् एकका
लासंबंधात्त्वन्नैवोपकार्योपकारकभावः। न कर्तृनिष्ठाद्दृष्टाद्भोक्तृनिष्ठो विषयोपरागः संभवतीत्यर्थः। ननु
पित्रा निष्ठेन गर्भाधानादिपुत्रकर्मणा पुत्रस्योपकारो भवतीति दृष्टान्तीकरणेनेवादृष्टेन भोक्तुर्विषयोप
रागः स्यादिति शंकते। पुत्रकर्मवदिति चेत् ३३ पुत्रकर्मवत् पुत्रसंस्कारकर्मवत्। दृष्टान्तासिद्ध्या परिहरति
नास्ति हि तत्र स्थिर एक आत्मा यो गर्भाधानादिना संस्क्रियेत। ३३। तव मते गर्भाधानादिकर्मणा पितुः पुत्रस्योपका
रो न घटते हि यस्माद्गर्भाधानमारभ्य स्थिर एक आत्मा यो गर्भाधानादिसंस्कारकर्मभिः संस्कार्यो नास्ति। अस्माकं
मते तु स्थैर्याभ्युपगमाद्वचनाच्च तत्र पुत्रनिष्ठादृष्टस्योत्पत्तेः पुत्रोपकारसंभव इति भावः। ननु क्षणिकोपि
घोऽनियतकारणकोऽभावकारणकोऽकारणक एव वास्त्वित्याशंक्य [illegible] पुनः प्रत्यवतिष्ठते। स्थिरकार्यासिद्धेः क्ष
णिकत्वं ३४ घटस्येति शेषः। तथा चाकारणकस्यास्थित्याशयः घटादिकं क्षणिकं सत्वात् दीपशिखावदिति
प्रयोगः। न च घटादौ व्यभिचारः पक्षसमत्वात्। एतदेवोक्तं स्थिरकार्यासिद्धेरित्यनेन न दूष्यते। न प्रत्यभिज्ञा
बाधात् ३५ न कस्यापि क्षणिकत्वं पदद्वा क्षं स एवायं देवदत्त इत्यादि प्रत्यभिज्ञानुगृहीतेन वंध्यादिकं स्थिरं स
पी॰ २ त्वात्। घटादिवदिति प्रत्यनुमानेन क्ष [illegible] कत्वस्य बाधात्। श्रुतिन्यायविरोधाच्च ३६। सदेव सोम्येदमग्र आ
सीत्। तम एवेदमग्र आसीत्। कथमसतः सज्जायेतेत्यादि स्मृतियुक्तिभिः प्रपंचभावकारणकत्वोक्तेरका

क्षणिकवाह्यपक्षेण। विज्ञानमात्रपक्षेण च सह समानक्षेमत्वात् तन्मतनिरसनहेतुकत्वाद् अयमपि
पक्षो न सम्यक्। क्षणिकपक्षनिरासहेतुः प्रत्यभिज्ञादिर्विज्ञानपक्षनिरासहेतुर्बाह्यप्रतीत्यादिश्च
त्रापि समान इति भावः। पश्चते ननु अस्यैव पुरुषार्थत्वमस्तु यतस्तदपि दुर्वचमित्याह। अपुरुषार्थ
त्वमुभयथा ॥४७॥ दुःखनिवृत्तिरूपतया दुःखनिवृत्तिसाधनतया वा अस्य पुरुषार्थत्वस्या
त्। तन्न घटते। स्वनिष्ठत्वेनैव तत्त्ववादीनां लोके पुरुषार्थत्वावगमात्। स्थिरस्य पुरुषस्य चानं गी
कारादिनार्थः अन्यान्यपि संभाव्यानि बन्धकारणानि निरस्यति। न गतिविशेषात् ॥४८॥ शरीरप्र
7 वेशादिरूपात् पुरुषस्य बन्धो नेत्यर्थः। हेतुमाह। निष्क्रियस्य तदसंभवात् ॥४९॥ स्पष्टं। ननु श्रुति
स्मृत्योर्गमनागमनश्रवणात्। सक्रियत्वमेवास्तु तथा च परिच्छिन्नत्वमपीष्यत इत्याह। मूर्तत्वाद्
घटादिवत्समानधर्मापत्तावपसिद्धान्तः ॥५०॥ घटादिवन्मूर्तत्वात् परिच्छिन्नत्वा त् तत्समा
नधर्माणां सावयवत्वविनाशित्वादीनामापत्तौ आत्मिकानामपसिद्धान्तः स्यादित्यर्थः। आत्मनो
परिच्छिन्नत्वे गतिश्रुतिरौपाधिकगतिपरा आकाशवत्। घटसंवृतमाकाशं नीयमाने यथा घटे। घटो नीये
त नाकाशं तद्वज्जीवो नभोपमः इति श्रुतेः। प्रकृतिः कुरुते कर्म शुभाशुभफलात्मकं। प्रकृतिश्च तदश्ना
ति त्रिषु लोकेषु कामगा इत्यादिस्मृत्या अतः प्रकृतिनिष्ठत्वावगमाच्च। पूर्वं विहितनिषिद्धव्यापाररूप
गतिमुपपादयति गतिश्रुतिरप्युपाधियोगादाकाशवत् ॥५१॥ निजः सर्वगतः स्थाणुरित्यादिप्रमाणेनात्मनोऽपरिच्छि १३

वस्त्व... नेन बंधो विमिच्येति । ननु कारणान्वेषणमिति विज्ञानवादिनां मतं निरोति । न विज्ञानमात्रेण
च...तेः ॥४२॥ उपप्रतीति दृष्टांतेन विषयाभावेप्युपपत्तिस्तत्राह । तदभावे तदभावाच्छून्यं तर्हि ॥४३॥
तर्हि बाह्याभावे शून्यं प्रसज्येत । कुतः बा... ह्याभावे विज्ञानाभावात् । प्रतीतिर्हि विषयसाधिका वा
ह्यप्रतीतिश्चेन्न । विषयं साधयेद्विज्ञानप्रतीतिरपि विज्ञानं साधयेदिति भावः । अस्तु तर्हि शून्यमेव
तत्वमतश्च बंधकारणान्वेषणं न युक्तं तुच्छत्वादिति नास्तिकशिरोमणिः प्रत्यवतिष्ठते । शून्यं तत्वं भा
वो विनश्यति वस्तुधर्मत्वाद्विनाशस्य ॥४४॥ शून्यमेव तत्वं यतः सर्वोपि भावो विनश्यति । यश्च विनाशी
स मिथ्या स्वप्नवत् । अतः सर्ववस्तूनामाद्यन्तयोरभावमात्रत्वान्मध्ये क्षणिकं सत्वं सांवृतिकं न
पारमार्थिकं ततः किं केन बध्येत । भावानां विनाशित्वे ... हेतुः वस्तुधर्मत्वाद्विनाशस्येति । वि
नाशस्य वस्तुस्वभावत्वादित्यर्थः । परिहरति । अपवादमात्रमबुद्धानां ॥४५॥ भावत्वाद्विनाशित्वमि
ति मूढानामपवादमात्रं मिथ्यावाद एव नाशकारणाभावेन निरवयवद्रव्याणां नाशासंभ
वात् । किं बहुना कार्याणामपि न विनाशसिद्धिः त्रुटो जीर्ण इति प्रत्यये नैव घटातीतः इत्यादिप्रत्यये
नापि घटादेरतीतावस्थायाः ... अवस्थापायाप्रसिद्धेः । किंच । उभयपक्षसमानक्षेमत्वादयमपि ॥४६॥

विरुद्धस्तत्राह। प्रधानाविवेकादन्याविवेकस्य तद्धाने हानं। ५५। बुद्ध्यादेः प्रधानाविवेकात् कारणात्
योऽन्याविवेको बुद्ध्यादेरविवेको जायते कार्याविवेकस्य कारणतमाऽनादिकारणाविवेकमूल
कत्वात् तस्य प्रधानाविवेकहाने सत्यवश्यं हानमित्यर्थः। ननु बुद्ध्याद्यभिमानातिरिक्ते प्रधानाभि
माने किं मानमहं गौरहं स्थूल इत्याद्यभिमानानां बुद्ध्यादिविषयत्वेनैवोपपत्तेरिति चेत्। न। मृत्वा पुनः
स्वर्गो स्वर्गी स्यां माऽहं नारकी स्यामित्याद्यभिमानानां प्रधानविषयत्वं विनानुपपत्तेः। सति त्वानां बु
द्ध्याद्यखिलकार्याणां पुनः सूक्ष्मभावात्। प्रधानस्यात्मत्वेनैव तत्पूर्वकालत्वं जन्मपदबुद्ध्यादिरू
पैकपरिणामत्यागेनापरबुद्ध्यादिरूपतया परिणमनमिति। किञ्च बुद्ध्यादिषु पुरुषाणामभिमा
नोऽनादिर्न तु पुनः सम्भवति बुद्ध्यादीनां कार्यत्वात्। अतः कार्याभिमानव्यवस्थार्थं नियामकतया
कारणाभिमान एव सिद्ध्यति। लोके तथैव दृष्टत्वात्। दृष्टो हि क्षेत्राभिमानात् क्षेत्रजन्य
धान्यादिष्वभिमानः स्वर्णाभिमानाच्च तज्जन्यकटकादिष्वभिमान इति। प्रधानाभिमानत
द्वासनयोश्च बीजाङ्कुरवदनादित्वान्न तदभिमाने नियामकान्तरापेक्षेति। नन्वेवमपि मुक्तस्य
च बन्धप्रसङ्गो विवेकाविवेकौ च स्यातां तर्हि नित्यशुद्धबुद्धमुक्तस्येति स्वोक्तविरोधोऽत आह॥

कर्मणा बंधो निराकृतः इदानीमदृष्टरूपकर्मणापि तन्निरस्यति। न कर्मणाप्यतद्धर्मत्वात्॥५२॥ अतिप्रस
क्तिरन्यधर्मत्वे॥५३॥ स्पष्टं। निर्गुणादिश्रुतिविरोधश्चेति॥५४॥ स्वभावादिभिः कर्मान्तरेणानेन वा के
नापि पुरुषस्य बंधोत्पत्तौ। साक्षी चेता केवलो निर्गुणश्चेत्यादिश्रुतिविरोधः। इति शङ्क्यं बंधहेतुप्र
श्नतासमाप्तो ननु प्रकृतिपुरुष संयोगोपि स्वाभाविकत्वे कालादिनिमित्तकत्वे वा मुक्तस्या
पि बंधापादक इत्यतो विशेषमाह। तद्योगोप्यविवेकान्न समानत्वं॥५५॥ प्रकृतिसंयोगोप्यविवेका
दतो न समानत्वं दोषस्य। मुक्तस्याविवेकाभावान्न पुनः संयोगो भवतीत्यर्थः। अविवेकश्च विषय
तासंबंधेन पुरुषधर्म इति न वैयधिकरण्यं। अगृहीतासंसर्गकज्ञानद्वयरूपश्चासौ तद्वा
सनारूपो वा। तस्य च संयोगाख्या जन्महेतुत्वं त्रिधा सा ज्ञानधर्माधर्मोत्पत्तिद्वारा रागादिद्वा
द्वारा वेत्यादि बोध्यं। एवं हेयहेतुं प्रतिपाद्य हानोपायं प्रतिपादयति। नियतकारणात्तदुच्छित्तिर्ध्वा
न्तवत्॥५६॥ शुक्तिरजतादिस्थले लोकसिद्धं यन्नियतकारणं विवेकसाक्षात्कारस्तत एवोच्छित्ति त ४
रविवेकोच्छित्तिर्न कर्मादिभिरित्यर्थः। यथा ध्वांतं प्रकाशेनैव नश्यति। एतदेवोक्तं पतञ्जलिना।
विवेकख्यातिरविप्लवा हानोपाय इति। ननु प्रकृतिपुरुषाविवेक एव चेत्प्रकृतिसंयोगद्वारा
बंधहेतुः तदा विवेकस्य चेन्मोक्षहेतुत्वं देहाद्यभिमानलक्षणो मोक्षः स्यात् स च स्तुत्यादि

तद्विवेकान्तो वः स्मादतस्तासिद्धौ प्रमाणमनुपन्यस्यति । अचाक्षुषाणामनुमानेन बोधो धूमादिभि
रिव वह्नेः ॥६०॥ अचाक्षुषाणामप्रत्यक्षाणामनुमानेनैतेषामोपलक्षणं । तथा चेश्वरकृष्ण
स्याह । सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात् । तस्मादपि चासिद्धं परोक्षमाप्तागमा
त्सिद्धमिति । विवेकप्रतियोग्यनुपयोगि पदार्थान् विवक्षमाणानुमानोपयोगिका प्रकारगणा
प्रकृतिः२ नं च दर्शयति । सत्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान्महतोऽहंकारोऽहंकारात्पंच तन्मात्रा
ण्युभयमिन्द्रियं तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पंचविंशतिर्गणाः ॥६१॥ लघुत्वादिगुण
२ योगात्सत्वादित्रयं द्रव्यं । तत्र गुणशब्दस्तु पुरुषोपकरणत्वात् । तदेव प्रकृतिर्नतु तदाधा
रवस्त्वन्तरं ॥ सत्वादीनामतद्धर्मत्वं तद्रूपत्वादिति वक्ष्यमाणत्वात् । साम्यावस्थान्यू
नाधिकभावेनासंहननं । अकार्यावस्थत्वमित्यर्थः । एवं च कार्यभिन्नं गुणत्रयं प्रकृति
रिति पर्यवसितोऽर्थः । इदं च मूलप्रकृतिलक्षणं । तत्वान्तरोपादानत्वं प्रकृतित्वमिति तु साम
न्यलक्षणं । उभयं वाह्याभ्यन्तरभेदेनैकादशविधं । स्थूलभूतानीत्युक्त्या तन्मात्राणां सूक्ष्मभूतत्वमभिप्रे राम
तं । पुरुषस्तु कार्यकारणविलक्षणः । एवं पंचविंशतिर्गणाः पदार्थसमूहः । अनुमानक्रममाह सूत्रेण । स्थूला

र्व्यज्ञानं न तु तत्त्वं चित्तस्थितेः ॥५८॥ बंधादीनां सर्वेषां चित्त एवावस्थानात् पुरुषे बंधादिवाऽज्ञानं स्फटिकलौ
हित्यवत्॥ न तु तत्त्वं। अनारोपितं जपालौहित्यवदित्यर्थः उक्तं च बंधमोक्षौ सुखं दुःखं मोहापत्तिश्च मा
यया। स्वप्ने यथात्मनः ख्यातिः संसृतिर्न तु वास्तवीति। मायपेति मायाख्यप्रकृत्यौपाधिकीत्यर्थः॥ न
न्वेवं तु दुःखस्य बंधस्य हानं कथं पुरुषार्थः कथं वाऽन्यधर्माभ्यां विवेकाविवेकाभ्यामन्यस्य बंधमोक्षौ संसा
कारे कर्मादिभिरिव नाव्यवस्थेति चेत्। अत्राभियुक्ताः समादधुः। यद्यपि दुःखयोगरूपो बंधो वृत्ति
रूपौ च विवेकाविवेकौ चित्तस्यैव तथापि पुरुषे दुःखप्रतिबिंब एव भोगः इत्यवस्तुत्वेपि तद्धानं
पुरुषार्थः। दुःखं माभुंजीयेति प्रार्थनात्। एवं च यस्मै पुरुषाय प्रकृतिरविवेकेनात्मानं दर्शितवती
तद्वासनावशात् तमेव संयोगद्वारा बध्नाति नान्यं। यस्मै विवेकेनात्मानं दर्शितवती तमेव स्ववि
योगद्वारा मोचयति वासनोच्छेदादिति व्यवस्थापि वृत्तेति। कर्मादिभिर्बंधाभ्युपगमेप्येवं
व्यवस्था न घटते। कर्मादीनां साक्षात् पुरुषे प्रतिबिंबनादिति। ननु बंधस्याऽज्ञानत्वे श्र
वणेन युक्त्या वा सा निवर्त्तेत किं विवेकसाक्षात्कारेणेत्यत आह युक्तितोपीति न बाध्यते दिङ्मूढव
दपवादादृते। यथा दिङ्मूढस्य वाऽज्ञानमपि दिग्विपर्ययं साक्षात्कारं विना न बाध्यते तथा प्रकृ
तावपि युक्तिभिन्नत्वं। अपि नाऽश्रवणसमुच्चयः बंधबाधो बंधनिवृत्तिः प्रकृतिपुरुषसिद्धौ हि

१०

गुणानुसारेणैवकार्यगुणौ चिंत्यचात्रानुकूलस्तर्कः। ननु विषयेषु सुखादिमत्वेन प्रमाणं नास्ति। अ
हं सुखी दुःखी मूढ इत्येवानुभवात् तत्कथं कान्तादिविषयो दृष्टान्त इति चेत्। अत्राहुः। सुखाद्यात्मक
बुद्धिकार्यतयास्रक्सुखं चन्दनसुखमित्याद्यनुभवेन च विषयाणामपि सुखादिधर्मकत्वसिद्धेः
किंच यस्यान्वयव्यतिरेकौ सुखादिना सह दृश्येते तस्यैव सुखाद्युपादानत्वं कल्प्यते। तस्य निमित्तत्वप
रिकल्पने स्वोपादानत्वकल्पने कारणद्वयकल्पनागौरवात्। अपि च। अन्यान्यसंवादेन प्रत्यभिज्ञ
या च विषयेषु सर्वपुरुषसाधारण्येन सुखसिद्धिः। तत्सुखग्रहणाय समन्वयवृत्तिनियमादिकल्पनागौ
रवं च फलमुखत्वान्न दोषावहं। विषयेष्वपि सुखादिकं च मार्कण्डेयपुराणे उक्तं। तं संतु चेतस्य यवापि दे
हे सुखानि दुःखानि च किं मम तत्रेति। अहं सुखीत्यादिप्रत्ययेषु अहं धनीत्यादिप्रत्ययवत् स्वस्वामिभावा
ख्यसंबंधविषयकाः। तेषां प्रत्ययानां समवायसंबंधविषयकत्वभ्रमनिरासार्थं तु सुखिदुःखिमूढे
भ्यः पुरुषो विविच्यते शास्त्रेष्विति। यत्तु विषयासंप्रयोगकाले शान्तिसुखसात्विकं सुखमादौ व्यज्यते।
तदेव बुद्धिधर्मत्वात् सुखमुच्यते इति। यच्चापि वैशेषिका यात्रार्थिका अन्यमप्यनुमितं तत्

पंचतन्मात्रस्य। ६२। अनुमानेन बोध्य इत्यनुवर्त्तते। स्थूलं पृथिव्यादि प्रसिद्धं तेन तन्मात्राणामनुमानं। अ
पकर्षकाष्ठापन्नानि स्थूलभूतानि स्वविशेषगुणद्रव्योपादानकानि स्थूलत्वात् घटवदिति प्रयोगः। बा
ह्याभ्यन्तराभ्यां तैरहंकारस्य। ६३। बाह्याभ्यन्तराभ्यामिन्द्रियाभ्यां तैस्तन्मात्रैश्च। तन्मात्रेन्द्रियाणि अभि
मानवद्द्रव्योपादानकानि अभिमानकार्यत्वात्। यन्नैवं तन्नैवं। यथा पुरुष इत्यनुमानप्रकारः। अत्र सा
धारणद्रव्याणां हिरण्यगर्भाहंकारोपादानकत्वमेवेत्यवधेयं। तेनान्तःकरणस्य। ६४। तेनाहंकारेणाको
ऽरणतत्कारणतया मुख्यस्यान्तःकरणस्य महदाख्यस्यानुमानेन बोध्यः। अत्र प्रयोगः। अहंकारद्रव्यं
निश्चयवृत्तिमद्द्रव्योपादानकं निश्चयकार्यद्रव्यत्वात्। यन्नैवं तन्नैवं यथा पुरुषादीति। अत्रायं त १२
र्कबोध्यः। सर्वोऽपि लोकः पदार्थमादौ स्वरूपतो निश्चित्य पश्चादभिमन्यते। अयमहं मयेदं कर्त्त
व्यमित्यादिरूपेणेति तावत्सिद्धं। तत्राहंकारद्रव्यकारणकोऽनयोः कार्यकारणभावेन तदाश्र
ययोरेव कार्यकारणभावो लाघवात् कल्प्यते। कारणवृत्तिलाभेन कार्यवृत्तिलाभस्यौत्सर्गिक
त्वादिति। ततः प्रकृतेः। ६५। ततो महत्तत्त्वात् कार्यात् प्रकृतेरनुमानेन बोध्यः। सुखदुःखमोहधर्मि
णी बुद्धिः सुखदुःखमोहधर्मकद्रव्यजन्या कार्यत्वे सति सुखदुःखमोहात्मकत्वादिति। कारण

श्रवणात्पुरुषः प्रकृतेर्मूलमस्तां पुरुषस्यानिःपत्यं चानानवस्था । अविद्याद्वारकत्वाच्च न कौटस्थ्य
हानिरपि स्मर्यते हि । तस्मादज्ञानमूलोयं संसारः पुरुषस्येत्यत आह ॥ पारंपर्य्येपि एकत्र परिनिष्ठेति पे २
संज्ञामात्रं । टी० पुरुषस्याविद्याद्वारा जगत्कारणत्वेपि एकत्राविद्यायां परिनिष्ठा परिणामिकारण
त्वपर्यवसानं । पुरुषस्यापरिणामित्वात् । अतो यत्र पर्यवसानं सैव प्रकृतिरिति । मूलप्रकृतिरि
ति हि मूलकारणस्य संज्ञामात्रं । नन्वेवं गगनादीनामेवोपपद्यते प्रकृतिकारणभूतजडतत्वांतराप
21 त्तेरित्यत आह । समानः प्रकृतेर्द्वयोः ॥ टी० । प्रकृतेर्मूलकारणविचारे द्वयोर्वादिप्रतिवादिनोः
समानः पक्षः । यथा प्रकृतेरुत्पत्तिः श्रूयते तथाकाशादिष्वपि न तत्वाधिक्यमिति । अ
विद्यापञ्चपर्वैषा प्रादुर्भूता महात्मन इत्यविद्याया अतश्चेतनस्यास्वरूपगोप्युत्पत्ति
श्रवणात् । सा च प्रकृतेरेव पुरुषसंयोगादिभिरभिव्यक्तिरूपाप्युक्ता । संयोगलक्षणो
त्पत्तिः कल्प्यते कर्मज्ञानयोरिति कौर्मे । प्रकृतिपुरुषयोर्जोप्युत्पत्तिस्मरणात् । अविद्या च

पिसत्त्वोपपत्त्युपोद्बलितत्वात्सांख्यप्रणीतैव साध्वीति मंतव्यं। एवं च श्रोतव्यः श्रुतिवाक्येभ्यो मंतव्यश्चोपपत्ति
भिरित्यत्र मननं सांख्यरीत्यैव। नन्वेवमपि अखिलजडेभ्यः पुरुषविवेक एव हेतुस्तत्किं संघ्रिजडाना
मन्योन्यविवेकोऽत्र दर्शित इति चेत्। प्रकृत्यादितत्त्वोपासनया सकलशुद्ध्यर्थं तद्विवेकस्याप्यपेक्षितत्वा
ति॰ दित्याशयेनाह। कार्यकारणभावशून्यस्य पुरुषस्य प्रकारान्तरेणानुमानमाह। संहतपरार्थत्वा स
त्पुरुषस्य। १६। संघातः कारणीभूतसंयोगस्तद्वतो व्यक्तमहदादेः परार्थत्वात् हेतोः पुरुषस्य बो
धः प्रयोगस्तु। विवादास्पदं प्रकृतिमहदादिकं स्वेतरस्य भोगापवर्गफलकं संहतत्वात् शय्यासना
दिवत्। अनेन चानुमानेन प्रकृतेः परोऽसंहत एव पुरुषः सिध्यति तस्यापि संहतत्वेऽनवस्थापत्तेः
इदानीं सर्वकारणत्वोपपत्तये प्रकृतेर्नित्यत्वमुपपादयति पुरुषभोक्तृत्वं स्थापयति सूत्रं। मूले मूलाभा
वादमूलं मूलं। १७। त्रयोविंशतितत्त्वानां मूलं प्रधानेऽनवस्थापत्त्या कारणान्तराभावादकारणं प्रधा
नमित्यर्थः। ननु तस्माद्व्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमेत्यादिस्मृत्या प्रधानस्यापि पुरुषादुत्पत्ति

रस्यहानेन्यतरयोगः ।१५। द्वयोः पूर्वत्वे सत्यपि पुरुषस्यापरिणामित्वात् कारणत्वहाने सति प्रकृतेः कारण
त्ववैचित्यमित्यर्थः । पुरुषस्यापरिणामित्वेपि जंतु तस्य संहत्यकारित्वे परार्थत्वापत्त्यानवस्था · असंहत्य
कारित्वे सदा महदादिकार्यप्रसंगः । प्रकृतिद्वारा परिणामकल्पनेन तु लाघवात्तस्या एव परिणामि
त्वमस्तु पुरुषे स्वामित्वात् सृष्टत्वो पचारो यथा योधेषु वर्तमानौ जयपराजयौ राज्ञि उपचर्येते
तत्फलस्य सुखदुःखभोक्तृत्वेन तत्स्वामित्वादिति । प्रकृतेर्मुख्यकारणत्वोपपत्तये विभुत्वमाह ।
परिच्छिन्नं न सर्वोपादानं ।१६। यतः सर्वोपादानं प्रधानं नातः परिच्छिन्नमित्यर्थः । न केवलत्वं सर्वोपाद प्र.६
२२ नत्वात् किंतु । तदुत्पत्तिश्रुतेश्च ।१७। तेषां परिच्छिन्नानां उत्पत्तिश्रवणाच्च · यद्यदल्पं तन्मर्त्यमिति प
रिच्छिन्नस्य मरणधर्मकत्वेनोत्पत्त्यवगमादिति भावः ।। इदानीमभावादेः कारणत्वं निरस्यति ।। ना
वस्तुनो वस्तुसिद्धिः ।१८। नरशृंगादिनावस्तुनोऽभावाद्वस्तूत्पत्तिर्न घटत इत्यर्थः ।। ननु जगदप्यव
स्त्ववास्तु तत्राह ।। अबाधाददुष्टकारणजन्यत्वाच्च नावस्तुत्वं ।१९। स्वप्नपदार्थस्येव प्रपंचस्य
बाधेन · न वा शुक्तिरजतादिवदुष्टेन्द्रियजन्यत्वं अतो नावस्तुतार्थमित्यर्थः ।। नावस्तुनो वस्तुसिद्धि

मिथ्यात्वा॰ ॰ नरे सूत्राद्युक्तिरित्येतो ॰ ॰ ॰ नत ॰ ॰ विवेक ॰ मिति। नन्वेवं प्रकृतिपुरुषा ॰ नुमानप्रकारसत्वेस
र्वेषां विवेकमननं कुतो न जायते तत्राह। अथोद ॰ ॰ वि ॰ ध्यान्नियमः।७०। मनने हि मंदो मध्यम उत्तम
इति त्रिविधा अपि अधिकारिणः तत्र मंदैः ॰ ॰ युक्तैः कुतर्कैरनुमानानि बाध्यंते मध्यमैर्विरुद्धास
ल्लिंगैः सत्प्रतिपक्षतानिष्पन्ना। उत्तमाधि ॰ ॰ ॰ णमेवतू त्तरीत्या मननमिति भावः सर्वेषामेव उक्त
रीत्या मननमिति नियमो नेत्यर्थः। महदहंकारयोः स्वरूपमाह सूत्राभ्यां। महदाख्यमाद्यं कार्यं
तन्मनः।७१। मन इति मननवृत्तिकं। मननमत्र निश्चयस्तद्वृत्तिका बुद्धिः तन्महदाख्यमाद्यं का
र्यं। चरमोहंकारः।७२। योहंकरोतीत्यहंकरोभिमानवृत्तिकः पदार्थः सः चरमो महतोऽनंतरो
हंकार इत्यर्थः। अतत्तत्कार्यत्वमन्येषामुपपन्नमित्याह तत्कार्यत्वमन्येषां।७३। ननु प्रकृतिः स
र्वकारणमिति लभ्युपगमविरोधो तत्राह। आद्यहेतुता तद्द्वारा पारंपर्येप्यणुवत्।७४। अणु।
आदिद्वारा घटादावणूनामिव महदादिद्वारा सर्वकार्ये प्रकृतेः कारणत्वमित्यर्थः। ननु प्रकृति
पुरुषयोः पूर्व ॰ भावित्वाविशेषे प्रकृतेरेव कारणत्वे किं नियामकं तत्राह। पूर्वभावित्वे द्वयोरेकत

नुश्रविकः स्वर्गादिर्बुद्धिक्षयातिशययुक्त इति। ननु निष्कामकर्मणः फलं मोक्षो भविष्यतीत्यत्राह
काम्येऽकाम्येऽपि साध्यत्वाविशेषात्॥ ८५॥ काम्यैः काम्यैर्वा कर्मभिर्लब्धे तेन फलत्वमस्त्यन्नपुरुषा
र्थेन कर्मसाध्यत्वस्य तुल्यत्वात्। ननु ज्ञानसाध्यस्य कथमत्यंतपुरुषार्थत्वमत्राह॥ निज
मुक्तस्य बंधध्वंसमात्रं परं न समानत्वं॥ ८६॥ निजमुक्तस्य स्वभावमुक्तस्यात्मनो बंधध्वं
समात्रं परं पुरुषार्थं विवेकज्ञानस्य फलं ध्वंसस्य चाभावत्वेन नित्यत्वान्न दुःखासमकत्वं॥ अतो
न समानत्वं ज्ञानकर्मणोः॥ तस्माद्विवेकज्ञानमेव साक्षाद्धेयहानोपायः॥ तस्य साक्षादुपा
यः प्रमाणानि संप्रति परीक्ष्यंते॥ द्वयोरेकतरस्य वाप्यसंनिकृष्टार्थपरिच्छित्तिः प्रमा तत्सा
धकतमं यत्तत्त्रिविधं प्रमाणं॥ ८७॥ अत्र सन्निकृष्टः प्रमातर्यनारूढो। नधिगत इति याव
त्। एवंभूतस्यार्थस्य वस्तुनः परिच्छित्तिरवधारणं प्रमा। सा च द्वयोः बुद्धिपुरुषयोर्धर्मोऽस्तु
एकतरस्यैव वा। उभयथापि तस्याः साधकतमं फलायोगव्यवच्छिन्नं कारणं यत्तत्प्रमा
णं तच्च त्रिविधमित्यर्थः॥ अत्र इति भ्रमसंशयानां व्युदासाय पदक्रमेणानधिगत इति वस्तुन
इति अवधारणमिति त्रयपदि प्रमास्वरूपं फलं पुरुषनिष्ठमुच्यते तदा बुद्धिवृत्तिरेव प्रमा॥

रितियदुक्तं तत्र हेतुमाह भावेऽप्ययोगेन तत्सिद्धिरभावे तदभावात्कुतस्तरां तत्सिद्धिः ॥ ८० ॥ भाव
रूपे कारणे सत्यप्ययोगेन सत्कार्यसिद्धिः अभावे तु सत्ताभावात्कुतः सत्कार्यसिद्धिः कारणसत्त्व
स्यैव कार्यस्योचितत्वात् तत्र एव स्वार्थे नन्वेवमप्यावश्यकत्वात्कर्मैव कारणमस्तु किं प्रधानेनेत्य
त्राह ॥ न कर्मणामुपादानायोगात् ॥ ८१ ॥ न कर्मणो द्रव्यादिवस्तुसिद्धिस्तस्य निमित्तत्वेनोपादानत्वा
योगात् ॥ इदानीं कर्मणां साधनतामादाय हेतुत्वं प्रतिपादयति पञ्चभिः सूत्रैः ॥ नानुष्ठेयं विकाराद्यपि त
सिद्धिः साध्यत्वेनानुपयोगाद् असम्पार्थत्वे ॥ ८२ ॥ गुरोरनुष्ठेयत्वे ह्यनुष्ठेयो वेदस्तत्र विहितमा
नुष्ठितं यागादिकर्म ततोऽपि न पूर्वोक्तपुरुषार्थसिद्धिः ॥ यतः कर्मसाध्यत्वे नाव्याप्तियो ।
गात् । अपुरुषार्थत्वे अत्यन्तपुरुषार्थत्वाभावः । तद्धेतुमाह स्वर्गस्य लोकगतस्यानावृत्ति
श्रुतावतत्राह ॥ तत्र प्राप्तविवेकस्यानावृत्तिश्रुतिः ॥ ८३ ॥ तत्र ब्रह्मलोके इति श्रुतिः ॥ ब्रह्मणा
सह ते सर्वे संप्राप्ते प्रतिसंचरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमित्यत्र कृतात्मनस्त्वस्य
त्वरसात् । कीदृशं हि फलं कर्मणस्तदाह ॥ दुःखविमोक्षो भवति दूरे यथा जीर्णमृगजलम् ।
मिथ्यैकार्थो दुःखबुद्धिरेव भवति ननु जाप्यविमोदस्पर्शः अतस्त्वेवशरकं माह ॥ दृष्टवद
तु

यः संबद्धः स तदाकारोल्लेखि विज्ञानं तत्प्रत्यक्षं ॥ ८ ॥ यो संबद्धं भवत् संबद्धवस्त्वाकारधारि भवति यद्वि
ज्ञानं बुद्धिवृत्तिः तत्प्रत्यक्षं प्रमाणमित्यर्थः ॥ अत्र सदितमन्तं हेतुगर्भविशेषणं ॥ तथा च स्वार्थस
२२ न्निकर्षजन्यत्वे सत्याकारोपेतवृत्तिः प्रत्यक्षं प्रमाणमिति निष्कर्षः ॥ वृत्तिः संबद्धार्थसर्पतीति च द्वयमा
ण सूत्रान्नवृत्तेः सन्निकर्षजन्यत्वं तदाकारस्य परिग्रहणं ॥ चक्षुरादिकं द्वारकं बुद्धिवृत्तिश्च प्र
दीपस्य शिखेव बाह्यार्थसन्निकर्षानन्तरमेव तदाकारोल्लेखिनी भवतीति नासंभवः ॥ ननु योगि
नां अतीतानागतव्यवहितवस्तुप्रत्यक्षे ऽव्याप्तिः संबद्धवस्त्वाकाराभावादित्याशंक्य तस्यालक्ष्य
24 त्वेन समाधत्ते ॥ योगिनामबाह्यप्रत्यक्षत्वान्न दोषः ॥ ९० ॥ ऐन्द्रियकप्रत्यक्षमेवात्र लक्ष्यं यो
गिनस्त्वबाह्यप्रत्यक्षकाः अतो न तत्राव्याप्तिदोष इत्यर्थः ॥ वास्तवं समाधानमाह ॥ लीनव
स्तुलब्धयोगज [illegible] धर्मजन्यातिशयस्य योगिचित्तस्य संबंधो घटते ॥ अत्र लीनशब्दः परामि
प्रेतासन्निकृष्टवाचीः सत्कार्यवादिनां हि अतीतादिकमपि स्वरूपतोऽस्तीति तत्संबंधः संभवी
ति ॥ व्यवहितविप्रकृष्टसंबंधे हेतुविधया लब्धातिशयेति विशेषणं ॥ अतिशयश्च व्याप

लीनवस्तुलब्धातिशयसंबंधाद्वा ऽदोषः ॥ ११ ॥ अथ वा स्तु योगप्रमत्तमपि लक्ष्यं तत्त्वापि न [illegible]

[illegible] राम

णं ॥ यदि बुद्धिनिबंधवृत्तिरूपं तत्र तदा इंद्रियसन्निकर्षादिरेव प्रमाणं । यदि तु पौरुषेयबोधो बुद्धि
वृत्तिश्चे भयमपि प्रमा चेतेतदोक्तमुभयमेव प्रमाणं भवति । चक्षुरादिषु तु प्रमाणव्यवहारः
परंपरयैवेति बोध्यं । ननु यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः क्षेत्रं क्षेत्री तथा कृत्स्नं प्र
काशयति भारतेत्यादिषु उपमानादिप्रकृतिपुरुषविवेकप्रमाणमुपन्यस्तं तत्कथं त्रिविधं ।
प्रमाणं तत्राह । तां सिद्धो सर्वसिद्धेर्नाधिक्यसिद्धिः ॥ ८८ ॥ त्रिविधप्रमाणसिद्धौ सर्वस्यापि ।
स्य सिद्धेर्न प्रमाणाधिक्यं सिध्यति ॥ गौरवादित्यर्थः । एतच्च मनुनापि प्रमाणत्रयमेवो
पन्यस्तं । प्रत्यक्षमनुमानं च शास्त्रं च विविधागमं । त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सि
तेति उपमानादीनां अनुमानशब्दयोः प्रवेशः । अनुपलब्धेस्तु प्रत्यक्षे इति ज्ञेया । गीता
ति यां सम अनुमानमभिप्रेतं । आपादतलमस्तकं कृत्स्नं त्वगवच्छिन्नेनैकेन प्रकाश्यत्वं समप्रका
शत्वात् त्रैलोक्यवदिति तेजश्चेतन्यसाधारणं प्रकाशत्वमखण्डोपाधिः प्रकाशव्यवहारनियामक
तया सिध्यते । कुरुषनिष्ठाप्रमेति पुरुषस्य सिद्धान्तमाश्रित्य प्रमाविशेषफलं कारणानि लक्षणमुपक्रमते ।

२९ हेतो। अधिष्ठातृत्वं कीदृशं तदाह॥ तत्सन्निधानादधिष्ठातृत्वं मणिवत्॥ टीका॥ तस्य पुरुषस्य सन्निधाना
त् संयोगमात्रात्। अधिष्ठातृत्वं प्रकृत्यधिष्ठातृत्वं महत्तत्त्वरूपेण प्रकृतिपरिणामयितृत्वं। न
तु संकल्पादिना। यथा अयस्कान्तमणेः सान्निध्यमात्रेण लोहाकर्षकत्वं। उक्तं च निरिच्छे संस्थिते र
त्ने यथा लोहः प्रवर्तते। सत्तामात्रेण देवेन तथा चायं जगज्जनिः। अत आत्मनि कर्तृत्वमकर्तृत्वं च
संस्थितं। निरिच्छत्वादकर्तासौ कर्ता सन्निधिमात्रत इति। लौकिककार्येष्वपि जीवानां सन्नि
धिमात्रेणाधिष्ठातृत्वमित्याह॥ विशेषकार्येष्वपि जीवानां॥ टीका॥ सन्निधानादधिष्ठातृ
25 त्वमित्यनुषंगः। जीवानां [illegible] कूटस्थचिन्मात्रत्वादित्यर्थः। ननु नित्यसर्वज्ञेश्वराभा
वे धर्मपरं परः। शंकया वेदप्रामाण्यं स्यादत आह। सिद्धरूपबोद्धृत्वाद्वाक्यार्थोपदेशः॥ टीका॥ हिर
ण्यगर्भादेः सिद्धरूपस्य यथार्थस्य बोद्धृत्वात्तत्कर्तृकवेदवाक्यार्थोपदेशः प्रमाणमिति शेषः
लौकिककार्येषु संकल्पादिनाधिष्ठातृत्वं कस्यचिदित्याशंकायामाह। अन्तःकरणस्य तदु
ज्ज्वलितत्वाल्लोहवदधिष्ठातृत्वं॥ टीका॥ अग्निसंयोगविशेषेण यथा लोहमुज्ज्वलितं राम

कत्वे वर्तिप्रतिबिंबकत्तमोति व्यत्यासोविति ज्ञेयं। ननु तथापीश्वरप्रत्यक्षे ऽव्याप्तिः तस्यानित्यत्वेन सन्निकर्षाजा।
न्यत्वात्तत्राह। ईश्वरासिद्धेः॥ ९२॥ अथ ईश्वरे प्रमाणाभावात् न दोष इत्यनुवर्त्तते। प्रपंचेश्वरप्रतिषेधश्च
एकदेशिनां प्रौढिवादेनैव। अत एवैश्वरासिद्धेरित्युक्तं नत्वीश्वराभावादिति बोध्यं। ईश्वराभ्युपगमेतु
सन्निकर्षजन्यजातीयत्वमेव विवक्षितं॥ साजात्यं च ज्ञानत्वसाक्षात्त्वाख्यजात्येति भावः। श्रुतिस्मृतिभ्यां।
कप्रतिषेधानसिद्धेरित्याशंक्य तर्कविरोधं वाध्यकमाह। मुक्तबद्धयोरन्यतराभावान्न तत्सिद्धिः। ९३।
ईश्वराभिमतो यः सर्वैः क्लेशादिभिर्मुक्तो बद्धो वा। अन्यतरस्याप्यसंभवान्नेश्वरसिद्धिः। तदेवाह।
उभयथाप्यसत्करत्वं॥ ९४॥ मुक्तत्वे सृष्टिप्रयोजकरागाद्यभावात् बद्धत्वे च मूढत्वान्न सृष्टिकर
त्वमीश्वरस्येति। स्वेच्छिकर्तृत्वेनैव हीश्वरः साध्यते परैः। आत्मनानसृष्टिपरः स [illegible] त्र बोध्यः। ना
नन्वेवमपीश्वरप्रतिपादकश्रुतीनां का गतिस्तत्राह। मुक्तात्मनः प्रशंसा उपासा सिद्धस्य वा। ९५।
केचित्ख्यातिस्मृतो मुक्तात्मनः केवलात्मनोऽज्ञापतोविधानापतस्य सन्निधिमात्रेणैश्वर्ये या स्तुति।
सा। केचिच्च उपासनासिद्धस्य नित्येश्वरस्येव नित्यत्वाद्युपासनासिद्धस्य योगेशाणिनित्यत्वादिना स्तुति

शेषवत् शेषो ऽपूर्वो यो ऽस्य विषयत्वेनास्तीति अप्रसिद्धसाध्यकमिति यावत् यथा पृथिवीत्वेनेतरभेदानुमानं २

ष्टं च। तत्र प्रत्यक्षीकृतजातीयविषयकं पूर्ववत्। यथा धूमेनानुमीयमानं वह्निजातीयो हि महानसा
दौ पूर्वं प्रत्यक्षीकृतः। व्यतिरेक्यनुमानं पृथिवीतरभेदो हि प्रागसिद्धः तद्विषयमिदमनुमानं।
सामान्यतो दृष्टं॥ यत्र सामान्यतः प्रत्यक्षादिजातीयमादाय व्याप्तिग्रहणं पक्षधर्मताबलेन
तद्विजातीयो ऽप्रत्यक्षो धर्मः सिद्ध्यति। यथा रूपादिज्ञानेन क्रियात्वेन करणवत्त्वानुमा
ने। अत्र हि पृथिवीत्वादिजातीयकुठारादिकरणमादाय व्याप्तिं गृहीत्वा तद्विजातीयमतीन्द्रि
यं ज्ञानकरणमिन्द्रियं साध्यते। तत्र सामान्यतो दृष्टादनुमानात् प्रकृतिपुरुषयोः सिद्धिः
महत्त्वं सुखदुःखमोहधर्मकद्रव्योपादानकं। कार्यत्वे सति सुखदुःखमोहधर्मकत्वं सुवर्णादि
जकुण्डलादिवत् इति प्रकृतौ। प्रधानं परार्थं संहत्यकारित्वादिति पुरुषे सामान्यतो दृष्टं बोध्यं।
प्रमाणफलभूतसिद्धेः पुरुषनिष्ठत्वेन पुरुषस्य परिणामितापत्तिरित्याशंक्य तस्याः स्वरूपमाह॥
चिदवसानो भोगः १०४॥ अत्र प्रमाणस्य बुद्धिवृत्त्यारूढं पदार्थजातं तस्याः सह पुरुषे प्रतिविं राम
बितं यदा सतेः स भोगः प्रमाणफलं। स चाभिमपरक्तबुद्धिप्रतिबिंबावच्छिन्नचैतन्यस्वरूप

लब्धप्रतिबिंबहेतुसंयोगः ... रणस्यान्तः
रत२ करणस्यसंबंधित्यादिद्वारेण मनुष्य ... अधिष्ठातृत्वमित्यर्थः ... बुद्धिसंसर्गस्तद्बुद्धिपूर्वकस्तेनतत्रमु
ख्याधिष्ठातृत्वेपि ।। अतएव मौनी इत्येषप्रामाणिकः ... कथंतेनाम या मबुद्धिपूर्वकस्तेन
प्रवृत्तोसस्तिं निरोधयतीति । तदेतस्येत्यादिनुक्तं ... सादेवत्कार्योन्मुखत्वमादाय
कथंचिन्नेयमितिभावः ।। अनुमानंलक्षयति ।। प्रतिबंधदृशः प्रतिबद्धज्ञानमनुमानं ।।१०१।। प्रति
बंधोव्याप्तिः तदुक्तं तन्निरूपकंच प्रतिबद्धं तथाच व्याप्यदर्शनाद्व्यापकज्ञानं वृत्तिरूपमनु
मानंप्रमाणं ।। अनुमितिस्तु पौरुषेयोबोधः ।। शब्दप्रमाणंलक्षयति ।। आप्तोपदेशः शब्दः ।।१०१
श व्या ६ आप्तोपदेशः शब्दस्तदुपदेशात्तज्जन्यं ज्ञानं ... प्रमाणं प्रमात्वं तत्रापि पौरुषेयोबोधः प्रमाण
प्रतिपादनस्यफलमाह ।। उभयसिद्धिः प्रमाणात्तदुपदेशः ।।१०२।। आत्मानात्मनोर्विवेकेन
सिद्धिः प्रमाणादेव भवति । अतः प्रमाणोपदेशः कृतः । येनानुमानविशेषेणात सिद्धिस्तदा
ह ।। सामान्यतो दृष्टादुभयसिद्धिः ।।१०३।। अनुमानं त्रिविधं पूर्ववत् शेषवत् सामान्यतो दृ।

२२ अवधिं न चितेरेव कार्यत्वात् प्रमाणफलत्वेनोपाख्यानविशेषसिद्धेः फलतोऽनोऽर्थं च तत्त्वाख्याने॥
॥१०॥ प्रमाणेन तत्त्वाख्याने प्रकृतिपुरुषयोः साक्षात्कारे सति पुरुषे दुःखं च न भवतीत्यर्थः। विद्वान् हर्ष
शोकौ जहातीति श्रुतेश्च। ननु प्रकृति [illegible] यदा तदा तस्मात् कस्मान्नोपलभ्यत इत्यत्राह। विषयो वि
षयोप्यतिदूरादेर्नोपादानामिन्द्रियस्य ॥१०॥ उपादानं संबंधः तदभावः इन्द्रियस्य।
संबंधासंबंधाभ्यां प्रत्यक्षविषयः प्रत्यक्षाविषयश्च पदार्थो भवतः। प्रत्यक्षाविषयत्वे हेत्वं
27 तरमतिदूरादेरिति। अतिदूरादौ त्वीश्वरकृष्णः संजग्राह। अतिदूरात्सामीप्यादिन्द्रियघातान्म
नोनवस्थानात्। सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहाराच्चेति। उदाहरणानि तु कौमुद्यां
व्यक्तानि। प्रकृत्यनुपलब्धौ कारणमाह। सौक्ष्म्यात्तदनुपलब्धिः ॥१०॥ तस्याः प्रकृतेरनु
पलब्धिः अप्रत्यक्षता। अत्र सूक्ष्मत्वं प्रत्यक्षप्रमाप्रतिबंधको धर्मविशेषः योगजधर्मस्या
ते जकत्वाद्योगिनां सूक्ष्ममपि प्रत्यक्षं भवतीति। तर्ह्यभावादेवानुपलब्धिरस्तु किं।
सौक्ष्म्यकल्पनेनेत्यत आह। कार्यदर्शनात्तदुपलब्धेः ॥१०॥ महदादिरूपकार्यदर्शनेन तस्याः राम

र्यवसितस्तत्स्वरूप एव॥ यतः। अतो नोक्तदोष इति भावः। ननु बुद्धिकृतधर्माधर्मफलत्वात् तन्नियोगः
कथमत आह॥ अकर्तुरपि फलोपभोगोऽन्नाद्यवत्॥२०५॥ यथान्यकृतस्यान्नादेरुपभोगो राज्ञो भव
ति तथा बुद्धिकृतधर्माधर्मफलस्य सुखदुःखस्योपभोगः पुरुषस्य। अविवेकस्य स्वस्वामिभावस्य
वा नियामकत्वान्नातिप्रसंगः। सुखदुःखादेः कर्मफलत्वं स्वीकृत्य बुद्धिगतं कर्मफलं पुरुषो भुं
क्त इत्युक्तम् इदानीं पुरुषगतभोगस्यैव कर्मफलत्वं स्वीकृत्य बुद्धिकर्मणा पुरुष एव फलमुप
यत इति मुख्यसिद्धान्तमाह॥ अविवेकाद्वा तत्सिद्धेः कर्तुः फलावगमः॥२०६॥ अथवा कर्तृबुद्धौ
जायमाने सुखं [illegible] दुःखं फलमेव न भवति सुखं भुंजीयेत्यादिकामनया भोगस्यैव
फलत्वात्। अतो भोक्तुर्निष्ठमेव फलं भवति तर्हि शास्त्रविहितं फलमनुपपन्नमिति शास्त्रव्यव
हारः कथं तत्राह। तत्सिद्धेरकर्तुरपि भोक्तुर्भोगाख्यसिद्धेः कर्तृबुद्धावविवेकात् कर्तुः फलावग
मः शास्त्रेष्विति शेषः। योऽहं करोमि स एवाहं भुंजे इति तत्त्वात् किं कामनुभवात् प्रातः सुखेन भूयादित्यादि
कामनायाः पुरुषेऽस्ति भूयादितिवत् फलसाधनत्वेनाप्युपपद्यते। भोगस्तु नान्यस्य साधनमिति
स एव फलमिति मुख्यसिद्धान्तः। भोग एव पुरुषस्य [illegible] कार्यं तानि बोध्यानि सुख

१८ शक्तस्य शक्यकरणात् ॥ ९ ॥ कार्यमिति । सत्त्वमेव ह्युपादानकारणं [illegible] तावस्थ
वेति । शक्तस्य कारणस्य शक्यकार्यकरणादपि नासदुत्पद्यत इत्यर्थः । ५ । कारणभावाच्च ॥ १९ ॥ च
कार्यस्य कारणात्मकत्वादित्यर्थः । नहि कार्यकारणयोर्भेदे कारणे सत् कार्यं त्वसदिति संभव
ति । कार्यस्य कारणाभेदसाधकान्यनुमानानि तत्त्वकौमुद्याम् । न पटस्तन्तुभ्यो भिद्यते तद्धर्मत्वा
५ ॥ त् इह यत्तो भिद्यते न तत्तस्य धर्मो यथा गौरश्वस्य । संयोगाप्राप्त्यभावश्चार्थान्तरत्वाभाव
साधकाः । अर्थान्तरत्वे हि संयोगो दृष्टो यथा कुण्डबदरयोः । अप्राप्तिर्वा यथा हिमवद्विं
28 ध्ययोः । न चेह संयोगाप्राप्ती । तस्मान्नार्थान्तरत्वं ॥ गुरुत्वान्तरकार्याग्रहणं च कार्यकारण
योरभेदसाधकं । इह हि यद्यस्माद्भिन्नं तस्मात्तस्य गुरुत्वान्तरकार्यं दृश्यते । पलिकस्य स्वस्तिकस्य गु
रुत्वकार्यो यावनतिविशेषस्ततो द्विपलिकस्य स्वस्तिकस्य गुरुत्वकार्यो वनतिभेदोऽधिकः स्य च
एव । तस्मादभिन्नस्तन्तुभ्यः पट इति । स्वात्मनि क्रियानिरोधबुद्धिव्यपदेशार्थक्रियाभेदाश्च नैका
न्तिकं भेदं साधयितुमर्हन्ति । एकस्मिन्नपि तत्तद्विशेषाविर्भावतिरोभावाभ्यामेतेषामविरोधा राम
त् । यथा हि कूर्मस्याङ्गानि कूर्मशरीरे निविशमानानि तिरोभवन्ति निःसरन्ति चाविर्भवन्ति न तु कू १८

प्रमाणिकत्वात् । ननु ब्रह्म जगतः कारणमिति केचित् परमाणव इत्यपरे । कथं प्रकृतेरेव प्रामाणिकत्वं इ
तिशंकते वादिविप्रतिपत्तेस्तदसिद्धिरिति चेत् ॥१११॥ तस्याः प्रकृतेः कार्येण कारणानुमानेन कश्चि
द्दोषस्तथापि येन समाधत्ते । तथाप्येकतरदृष्ट्या एकतरसिद्धेर्नापलापः ॥११२॥ कार्यदृष्ट्या कारण
सिद्धेर्न कारणापलापः इत्यर्थः । इदानीं प्रकृतेरेव कारणत्वे युक्तिमाह । त्रिविधविरोधापत्तेश्च ॥
११३ ॥ जगति उपलभ्यमानस्य सुखदुःखमोहात्मकत्वस्य विरोधः स्यात् ब्रह्मणः परमाणू
नां कारणत्वे । इदानीं कार्यस्योत्पत्तेः प्रागपि सत्त्वं व्यवस्थापयति । नासदुत्पादो नृशृंगवत् ।
॥११४॥ नृशृंगतुल्यस्यासत उत्पादो न संभवति । तत्र हेतुमाह । उपादाननियमात् ॥११५॥ उपा
दानमृदादौ कार्यस्य घटादेर्नियमात् । उत्पत्तेः प्राक् कारणे कार्यस्य सतापि न कोपि विशेषोस्ति येन मृ को ६
द एव घटमेवासन्तं जनयेन्न पटादिः । तंतव एव ... असंतं जनयेयुर्न घटादिं । कार्यासत्तायां
तु लिङ्गाभावे ... कारे भावत्वापत्तिः । उपादाननियमे प्रमाणमाह । सर्वत्र सर्वदा सर्वासंभवा
त् ॥११६॥ सर्वासंभवात् सर्वानुत्पत्तेः लोके दर्शनादिति शेषः । इतश्चासदुत्पादो नेत्याह ॥ श

कार्यस्य कारणाद् अभिव्यक्तिमात्रं लोकेऽपि यथा शिलामध्यस्य प्रतिमायाः शैल्पिकव्यापारेणाभि-
व्यक्तिमात्रं तिलस्य तैलस्य निष्पीडनेन धान्यस्य तण्डुलादेरवघातेन चेति। नाशस्वरूपमाह। ना-
शः कारणे लयः। ध्वंसः। लीङ् श्लेषणे इति धात्वनुसारात् लयः सूक्ष्मतया कारणेऽविभागः
स एवातीतत्वस्यावस्थेति ध्वंस इत्युच्यते। अनागतावस्था तु प्रागभाव इत्युच्यते इति शेषः। लीन- लई
कार्यस्य तु पुनरभिव्यक्तिर्नास्ति प्रत्यभिज्ञाद्यापत्त्या पातञ्जलेन निराकृतत्वात्। परेषामिवा
२२ सांकर्ममप्यनागतावस्थायाः प्रागभावाख्यायाः अभिव्यक्तिहेतुत्वाच्चेति केचित्। अपरे तु
लई यदि यो नाशः पुनरुत्पन्नोऽपि दृश्येत न च दृश्यत इति आशंक्य मतं दर्शन दृश्यते विवेचकैर्दृ-
श्यत एव तथा हि। तैलेन घटस्य रूपेण परिणामः [illegible] सदृश कार्पास सवदारूपेण परिणामः। त-
स्य पुष्पफलत्वं तद्रूपेण परिणामः। एवं सर्वे भावा इत्याह। नन्वतीतमप्यस्ति चेत्तर्हि किं प्र-
माणं न ह्यनागतसत्तायामिति चेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत इत्या-
यः। अन्यथा यद्यतीतसत्तायां किंचित्प्रमाणमुपलभ्यते स्यादिति चेत्। अत्राहुः केचि-
दभियुक्ताः। योगिप्रत्यक्षमन्यथानुपपत्त्या नागतातीतयोः सत्त्वे। [illegible] :यद्द सामा श्रीराम

पि

मतस्तदंगानि उत्पद्यन्ते प्रध्वंसन्ते वा। एवमेकस्या मृदः सुवर्णस्य वा ते ते कुटमुकुटादयो निःसरंतः।
आविर्भवन्ति उत्पद्यन्ते इत्युच्यन्ते। निविशमानाः तिरोभवन्ति विनश्यन्तीत्युच्यन्ते। न पुनरसता
मुत्पादः सतां वा नाशः। यथा कूर्मः स्वावयवेभ्यः संकोचविकाशिभ्यो न भिन्नः एवं कुटमुकुटाद
यो पि मृत्सुवर्णादिभ्यो न भिन्नाः। इत्थं तन्तुषु पट इत्यादि बुद्धिव्यपदेशभेदा अपि इह वने तिलका इ
तिवदुपपन्नाः। न चार्थक्रियाभेदो ऽभेदमापादयति। एकस्यापि नानार्थक्रियासंदर्शना
त्। यथा प्रत्येकं विष्टयो दर्शनलक्षणामर्थक्रियां कुर्वन्ति न तु शिबिकावहनं। मिलितास्तु शि
बिकामुद्वहन्ति। एवं तन्तवः प्रत्येकं प्रावरणमकुर्वाणा अपि आविर्भूतपटभावाः प्रावरिष्यं
तीति शंकते। ननु भावे भावयोगश्चेत्॥ १९॥ कापि स्यादुत्पत्तिः प्रागपि भावे तद्रूपे सति उत्पत्ति
प्रयोजनं चेत्। असत एवोत्पत्तिव्यवहारात्। समाधत्ते। नाभिव्यक्तिनिबंधनौ व्यवहारौ॥ २०॥
कार्योत्पत्तेर्व्यवहारो व्यवहारो कार्याभिव्यक्तिनिमित्तकौ। अभिव्यक्तिः तदुत्पत्तिव्यवहारोऽभि
व्यक्त्यभावात् नोत्पत्तिव्यवहाराभावो नत्वसतः सत्तया। अभिव्यक्तिः सूचनं ज्ञानं किंतु वर्तमानाव
स्था। कारणव्यापारो पि कार्यस्य वर्तमानलक्षणमेव धारयन् सन्नेव जनयति दृष्टं च सतः

सां०क

२० सं० यथा खादिरं सूत: । स्वादिबीजान्युभवन्ति बीजान्यन्यानि वैतानि इति [illegible]
धत्तु तत्र न व्यवस्था नास्तीत्याह । उत्पत्तिवद्वा दोष: ॥ २३ ॥ यथा घटोत्पत्तेरुत्पत्ति: । स्वरूपमेव परै: स्वीक्रियते ।
लाघवात् । तथाऽस्माभिर्घटाभिव्यक्तेरभिव्यक्ति: स्वरूपमेवेष्यते । तथा चैत्यन्ताविवाभिव्यक्त्यापि नान
वस्था दोष इत्यर्थ: । अथाभिव्यक्तेरभिव्यक्त्यनङ्गीकारे कारणव्यापारात् प्राक् तस्या: सत्त्वानुपप १४
त्त्या सत्कार्यवादो भज्येतेति । नन्वेवं महदादीनामेव प्रागसत्त्वं सिध्यतु किमभिव्यक्त्याख्यावस्थाकल्प
२० नेनेति चेत् । अत्राहुरभियुक्ता: । तद्व्यदंभिप्यादिश्रुतिभिर्व्यक्तावस्थयाऽसतामेवाकार्याणामभि
व्यक्ति सिद्धि: । अथैवमभिव्यक्ते: प्रागभावादिस्वीकारापत्ति: नेति सूक्ष्मानागताद्यवस्थानामन्यो
न्यमन्योन्याभावरूपतयोपगमात् । तादृशाभावनिवर्तकैककारणव्यापारसाकल्यादि संभवात् । अ
यमेव हि सत्कार्यवादिनामसत्कार्यवादिभ्यो विशेषो यन्नैरुच्यमानौ प्रागभावप्रध्वंसौ कार्यस्याना
गतातीतावस्थाभावरूपेऽभ्युपेते वर्तमानताख्याऽभिव्यक्त्यवस्थावदर्थतत्व्यतिरिक्ता । घटादे
रवस्थात्रयवत्त्वानुभवादिति नाधिकमस्य कल्पनायामिति । एवं सत्कार्यमुपपाद्य प्रधा
नात्कार्याणां वैधर्म्यं च स्मृति । हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गं ॥ २४ ॥ अत्र व्यक्त
२०

न्यविषयस्याहेतुत्वात् अन्यथा वर्तमानस्यापि प्रत्यक्षेण सिद्ध्यापत्तेः। तस्माद्योगिनां स्वाभाविकप्रा
माण्येनासति बाधके योगिप्रत्यक्षेणातीतमपि सिद्ध्यति। योगिनामतीतानागतप्रत्यक्षे च
श्रुतिस्मृतीतिहासादिकं प्रमाणमिति। नन्वभिव्यक्तिरपि पूर्वं सती असती वा। आद्ये का
रणव्यापारात्प्रागपि कार्यस्याभिव्यक्त्याख्यकार्यजनकतापत्तिः कारणव्यापारवैयर्थ्यं
च। असत्त्वे चेत् सत्कार्यवादहानिः। अथ सत्या एकाभिव्यक्तेरभिव्यक्त्यन्तराधिकारण
व्यापारस्वीकारेऽनवस्था इत्याशंकायामाह। पारंपर्यतोऽन्वेषणा बीजांकुरवत्॥ २४॥ परं
परारूपेणाभिव्यक्तेः स्वीकारः कार्यः बीजांकुरवत् प्रामाणिकत्वात् बीजांकुराभ्यां चा
यमेव विशेषो यद्बीजांकुरस्थले आमिकपरंपरयानवस्था। अभिव्यक्तौ चैकका
लिकपरंपरयेति प्रामाणिकत्वं तुल्यमेव। अत्र च बीजांकुरदृष्टान्तो लोकदृष्ट्योपन्य
स्तो वस्तुतो जन्मकर्मादिवदित्यत्रैव तात्पर्यं। तेन बीजांकुरप्रवाहस्यादिसर्गावधिकत्वे
नानवस्थाविरहेऽपि न क्षतिः। आदिसर्गो हि दृष्टं विनैव बीजमुत्पद्यते हिरण्यगर्भसंक
ल्पेन तच्छरीरादिवदत्र प्रसिद्धं तत्र तत्र। अतएव विद्वज्जनैः। यथा हि पादयोर्मूल

२२ पूर्वोऽपेक्ष्यते॥ अन्यथा तु द्वीरगासतीनां त्वमहंकारं जनयितुमिति स्थितिः। एवमहंकारादिभिरपि स्व
कार्यजनने इति सर्वस्य कार्यस्य प्रकृत्यापूरमपेक्ष्यते तेन प्रकृतिर्पयासपेक्षमाणं कारणमधिकं।
ण्यापजननेऽपरतंत्रमुक्तं। एताद्दैरीतमव्यक्तमिति यदुक्तं भवति तदुक्तं सावयवं परतंत्रम २३
क्तं विपरीतमव्यक्तं हेतुमत्त्वादिकमिकारणयोर्भेद एव सिद्ध्यति सतः कार्यस्य कारणाभे
दप्रमाणान्याह॥ मंगलपादमभेदतो वा गुणसामान्यादेस्तत्सिद्धिः प्रधानव्यपदेशाद्वा॥ २२॥
२१ तत्सिद्धिः कार्यस्य कारणातिरेकेण सिद्धिः क्वचिदं जस्मात् प्रत्यक्षत एवानायासेन भवति यथा
२५ सौत्याद्दिनां तत्वादिभ्यः पटादीनां। क्वचिद्गुणसामान्यादरभेदतो गुणसामान्यापात्मक
त्वात् लिंगात्। यथाध्यवसायादिगुणात्मकस्वरूपेण कारणत्वे धर्मेण महदादीनां। यथा
वा महाप्पृथिवीत्वादिसामान्यात्मकत्वात्पेण तन्मात्रेलैधर्म्येण पृथिव्यादीनां। आदिशब्द
हीतेन कर्मात्मकतावैधर्म्येण स्थिरावयवेभ्यो व्यतिरिक्तस्य चंचलावयविनः। प्रधानव्यपदे
शाद्वा प्रधीयतेऽस्मिन्कार्यमिति हि प्रधानं एतच्च कार्यकारणयोर्भेदाभेदौ विना न घटते राम

मितिपूरणीयः । तद्व्यक्तादिरूपं हेतुमत्त्वादयस्तत्र विधीयन्ते हेतुमत् कारणवत् । अनित्यं विनाशि ति
रोभावीति यावत् । अव्यापि सर्वं परिणामिन व्याप्नोति कारणेन हि कार्यमाविष्टं न कार्येण कारणं न
च बुद्ध्यादयः । कार्यं व्याप्नुवन्ती त्वाव्यापकं व्यक्तं । सक्रियं परिस्पंदवत् । बुद्ध्यादयो ह्युपात्तमुपात्तं
देहं त्यजंति देहांतरं चोपाददत इति तेषां परिस्पंदः । शरीरपृथिव्यादीनां च परिस्पंदः प्रसिद्ध एव ।
अनेकं प्रतिपुरुषं बुद्ध्यादीनां भेदात् । पृथिव्याद्यपि हि शरीरघटादिभेदेनानेकमेव । आश्रितं स्व
कारणमाश्रितं बुद्ध्यादि कार्यं । अभेदेपि कथंचिद् भेदविवक्षया । आश्रयाश्रयीभाव इत्युक्तं । लिंगं
प्रधानस्येति शेषः । बुद्ध्यादयो हि प्रधानस्य लिंगं न तु प्रधानं पुरुषलिंगं भवतीति भावः । ईश्व
रकृष्णेन तु सावयवं परतंत्रमिति वैधर्म्यद्वयमधिकमुक्तं । अवयवनमवयवः मिश्रणं सं
योग इति यावत् । अप्राप्तिपूर्विका प्राप्तिः संयोगस्तेन वर्तत इति सावयवं । तथा हि । पृथिव्यादयः
परस्परं सं[illegible]युज्यंते । एवमन्येपि । न तु प्रधानस्य बुद्ध्यादिभिः संयोगः तादात्म्यात् । नापि सत्व
रजस्तमसां परस्परं संयोगः । अप्राप्तेरभावात् । परतंत्रं बुद्ध्यादि हि स्वकार्येऽहंकारे जनयितव्ये प्रकृत्या

वैधर्म्य २

स१

उः तोऽ स्वात्मकं । एवं तमोऽपि ... दिनानाभेदं ... [illegible] ... पन्नीति ... वै
धर्म्यमाह । लघ्वादिधर्मैः साधर्म्यं वैधर्म्यं च गुणानां ॥ १३ ॥ लघ्वादीति भावप्रधानो निर्दे
शः । लघुत्वादिधर्मेण सर्वासां सत्वव्यक्तीनां साधर्म्यं चैवं रजस्तमोभ्यामेव चलत्वादिधर्मेण
सर्वासां रजोव्यक्तीनां साधर्म्यं सत्वतमोभ्यां च वैधर्म्यं एवं गुरुत्वादिधर्मेण सर्वासां तमोव्य
१२ क्तीनां साधर्म्यं सत्वतमोभ्यां वैधर्म्यमिति । अत्र लघुत्वादीनां साधर्म्यत्वकथनात्सत्वादि
नां कारणद्रव्याणां प्रत्येकमानन्त्यं भाति समानानां धर्मस्यैव साधर्म्यत्वात् । एवमेव सि
द्धान्त इति केचित् । न च मूलकारणस्यानन्त्ये व्यक्तित्वविरोध एकमतात्को विशेष इति चेत्
कारणद्रव्यस्य शब्दस्पर्शादिराहित्यमेव । शब्दस्पर्शविहीनं तद्रूपादिभिरसंयुतं । त्रिगुणं त
ज्जगद्योनिरनादिप्रभवाप्ययमिति विष्णुपुराणाद्यनुसारादिति च तत एव समाधेयम् । अ
न्ये तु लघुत्वादिधर्मैर्वैधर्म्यं साधर्म्यं तु अन्योन्याभिभवजननमिथुनवृत्तित्वेनेत्याहुः ।
२ अत्रैव वैधर्म्यमाह । सत्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः । गुरुवरणकमेव तमः राम
२ प्रदीपवच्चार्थतो वृत्तिः ... रिति ॥ १३ ॥ अर्थतः पुरुषार्थतः । प्रीत्यप्रीतिविषादात्मकाः

मे २

प्यतो भेदस्य स्याधारत्वासंभवात् वाचस्पतिमिश्रचार्य इदानीं कार्यस्य यैर्हेतुभिः कारणानुमानं तत्र कार्यका
रणयोः सा घर्म्यं दर्शयति त्रिगुणाचेतनत्वादिद्वयोः॥ १२॥ त्रिगुणत्वं सुखदुःखमोहात्मकत्वं ग्र
इति शब्दा ग्राह्यतीश्वरस्य भ्रमः संजग्राह। त्रिगुणमविवेकि विषयः सामान्यमचे तनं प्रसवधर्मि
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमानिति॥ १३॥ अविवेकि विषय इत्येकपदं। अज्ञैरवबुद्ध
मितितदर्थः। अविवेकि विषय इति द्वेधा। अविवेकित्वं संभूयकारित्वं। विषयत्वं भोग्यत्वं। सामा
न्यं सर्वपुरुषसाधारणं। पुरुषभेदप्यभिन्नानीति यावत् प्रसवधर्मि परिणामि प्रधानाख्यानां
जगत्कारणगुणानां अन्योन्यविवेकायतेषामवाँ खेधर्ममाह। प्रीत्यप्रीतिविषादात्मकैर्गुणाना त
मन्योन्यैर्वे धर्मः॥ १४॥ गुणानां सत्वादीनामन्योन्यं सुखदुःखमोहा [illegible] यैर्वैधर्म्यं कार्येषु
तद्दर्शनात् सुखादिकं चव्रटादिरूपादिवदेव धर्मोन्तः कारणोपादानकत्वादन्यका परिणामितिप्र
ग्वनिरूपितं अत्रादिशब्दग्रहात्याः पंचशिखाचार्यैरुक्ताः सत्वं नाम प्रसादलाघवाभिष्वंग
प्रीतितितिक्षासंतोषरूपानंतभेदं समासतः सुखात्मकं एवं रजोपि शोकादिनानाभेदं समास।

सां॰ त॰

२२

नुनेते सत्व [illegible] ः सत्वरजस्तमोभिगुणैस्तमः [illegible] ः शमादिः संप्रयोगो वियो
गो नाप्रलयस्तेइतः [illegible] कौमुद्यां॥ [illegible] ॥ अलमधिकेन
महदादीनां कार्यत्वे प्रमाणमाह॥ उभयोत्पन्नत्वात् कार्यत्वं महदादेर्घटादिवत्॥ १२२॥ महदादिपंचभू
तान्तावन्त पुरुषो भोग्यत्वात्। नापि प्रकृतिर्मोक्षान्यथानुपपत्त्या विनाशित्वात्। अतः प्रकृतिपुरुष
भिन्नं तद्भिन्नत्वाच्च कार्यं घटादिवत् हेत्वन्तरमाह॥ परिमाणात्॥ १२३॥ परिच्छिन्नत्वादित्यर्थः॥ किं
चासमन्वयात्॥ १२४॥ उपवासादिना क्षीणं हि बुद्ध्यादितत्वमन्नादिभिः समन्वयेन समनुगमेन पुन
२३ रुपचीयते। अतः समन्वयात्। कार्यत्वमुन्नीयते॥ नित्यस्य हि निरवयवत्वेन अवयवानुप्रवेशरूप
समन्वयो नोपपद्यत इति समन्वये च प्रमाणं श्रुतिः। अ॥ भिपुन्नेकरुदाहृता मनः प्रकल्पयत्येवं ते सो॥
म्यषोडशानां कलानामेका कलातिशिष्टा सान्नेनोपसमाहिता प्राज्वालीदिति॥ किंच शक्तित
श्चेति॥ १२५॥ कारणतश्चेत्यर्थः॥ पुरुषस्य पर्यंकरणं च ह्युरादितत्कार्यमिति महत्त्वमपि कार्यं
अन्येषां तु सुतरां कार्यत्वमिति। चशब्द इतिशब्दश्च हेतुवर्गसमाप्त्यर्थः। यदि च महदादिषु मध्ये
किंचिदकार्यं स्वीक्रियेत तदापि तदेव प्रकृतिः पुरुषो वेति सिद्धं नः समीहितं प्रकृतिः पु
रुषविवेक एवास्माकं तात्पर्यादित्याह॥ तद्धाने प्रकृतिः पुरुषो वा॥ १२६॥ तद्धाने कार्यत्वहानेय राम

प्रकाशप्रवृत्तिनियमार्थाः। अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः [illegible] इति।१२। अस्यार्थः
प्रीतिः सुखं। अप्रीतिर्दुःखं विषादो मोहः। एतदात्मकाः क्रमेण सत्वरजस्तमःसंज्ञाख्या गुणाः। गुणा इति परार्थाः
एषां प्रयोजनमाह। प्रकाशप्रवृत्तिनियमार्थाः। रजः प्रवर्तकतया सत्वं लघु सर्वत्र प्रवर्तयेद्यदि तमसा गु
रुणा न नियम्येत। तमो नियतं तुच्छं चेदेव प्रवृत्तमतीति भवति तमो नियमार्थं। प्रयोजनमुक्त्वा क्रियामा
पा ५ ह। अन्योन्येत्यादिवृत्तपदस्यान्तेन। वृत्तिः क्रिया सा च प्रत्येकमभिसंबध्यते। अन्योन्याभिभववृत्तयः
एतेषामन्यतमेनाधिकवशादुद्भूतेनान्यतमोऽभिभूयते तथाहि। सत्वं रजस्तमसी अभिभूय शान्ता
त्मनो वृत्तिं प्रतिलभते। एवं रजः सत्वतमसी अभिभूय घोरां। एवं तमः सत्वरजसी अभिभूय
मूढामिति। अन्योन्याश्रयवृत्तयः। यद्यपि द्व्यणुकस्य क्रियासतस्याश्रयेत्युच्यते तथाहि। सत्वं प्रव १६
त्तिनियमावाश्रित्य रजस्तमसोः प्रकाशेनोपकरोति। रजः प्रकाशनियमावाश्रित्य प्रवृत्त्या तयोः।
तमः प्रकाशप्रवृत्ती आश्रित्य नियमेनेतरयोरिति। अन्योन्यजननवृत्तयः। अन्यतमोऽन्यतमम
न्यं जनयति। जननं च परिणामः। स च गुणानां साम्यरूपः। अन्योन्यमिथुनवृत्तयः। अन्यो
न्यसहचराः अविनिर्भागवर्तिनः इति यावत्। [illegible] भवति चात्रागमः। अन्योन्यमिथु
नाः सर्वे सर्वे सर्वत्रगामिनः। रजसो मिथुनं सत्वं सत्वस्य [illegible] रजः। तमसश्चापि मि

२४ धर्मित्वाभ्युपगमात् । किंतु विवेकसिद्ध्यर्थमेव प्रमाणापदेति तत्रैवाह । शरीरादिव्यतिरिक्तः पुमान्
।१३९। पुमान् द्रष्टा शरीरादिव्यतिरिक्त इति साध्यं । अत्र हेतूनाह सूत्रैः । संहतपरार्थत्वात् ।१४०। उ
क्तार्थमेतत्सूत्रं उक्तस्यापि हेतोर्हेतुवर्गसंकलनार्थः पुनरुपन्यासः ॥ त्रिगुणादिविपर्ययात् ।१४१।
सुखदुःखमोहात्मकत्वादिविपर्ययादित्यर्थः ॥ आदिशब्दादचेतनत्वादिग्रहणं ॥ अधिष्ठाना
च्चेति ॥१४२॥ अधिष्ठानाच्चेत्यर्थः । संयोगविशेषेण परिणामहेतुत्वमधिष्ठानत्वं संयोग
श्च भिन्नयोरेवेति भावः । इति हेतुसमाप्तौ उक्तानुमानेऽनुकूलं तर्कं प्रदर्शयति सूत्राभ्यां । भो
७४ क्तृभावात् ॥१४३॥ कैवल्यार्थं प्रवृत्तेश्च ॥१४४॥ यदि शरीरादिस्वरूप एव भोक्ता स्यात् भोक्तृत्व
मेव व्याहन्येत । स्वस्य स्वादात्स्वभोक्तृत्वानुपपत्तेः । किंच । शरीरादिकमेव चेत् भोक्तृ स्यात् तत
दा भोक्तुः कैवल्यार्थं दुःखात्यंतोच्छेदार्थं कस्यापि प्रवृत्तिर्नोपपद्येत । शरीरादीनां विनाशित्वात् प्रकृतेश्च धर्मि
ग्राहकमानेन दुःखादिस्वभावत्वात् कैवल्यानुपपत्तेः ॥ किंच । पुरुषः जडप्रकाशायोगात् प्रकाशः ॥१४५॥
लोके जडस्य प्रकाशस्य लोष्टादेः प्रकाशोऽत्यन्तादर्शनेन सूर्यादिवत्प्रकाशरूप एव पुरुषः । समर्थ्यते हि ।
यथा दीपः प्रका [illegible] दीनामभानं ज्ञानात्मानं तथावि धानस्फांसर्वजंतुर्विति । ननु प्रकाश ॥

दियरिणामितदाप्रकृतिः यच्चपरिणामिभोक्तातदापुरुषः। तदेतदुरन्यत्वेतु कृत्वं ।२४। अकार्यैति
कारणतयाभोक्तृतयावासिद्धातिनान्यपेत्यर्थः। प्रकृत्यनुमानेनुक्तंविशेषमाह॥ कार्यात्कारणा
नुमानंतत्साहित्यात ।२५। तत्साहित्यात। कार्यसाहित्यात। महदादिकंस्वोपहितत्रिगुणात्मकव
स्तूपादानकंकार्यत्वात। शिलामध्यस्थप्रतिमादिवत। तैलदिवत्चेति। कार्यविशिष्टतयैवकार
णानुमानंननुतादृशेणनपरेधर्मिवेतिभावः। प्रकृतेःकार्यद्विवेकार्यवैधर्म्यमाह॥ अव्यक्तंत्रि
गुणल्लिंगात॥२६॥ अभिव्यक्तात त्रैगुण्यात्कार्यात्महत्त्वादेरपिप्रधानमव्यक्तंसूक्ष्मं। तदीपो ग्र ६
गुणोपिसुखादिर्नसाक्षात्क्रियतइतिभावः। नचसूक्ष्मत्वान्तस्यापलापस्योचितइत्याह॥ तत्का
र्यतस्तत्सिद्धेर्नापलापः॥२७॥ एवं प्रकृत्यनुमानगताविशेषाविचारिताः। अतःपरंपुरुषा
नुमानगतान्विशेषान्दर्शयति। सा॰ग्रध्याप्यसमाप्तेः। सामान्येनविवादाभावाद्धर्मवन्नसा
धनं।२८। यत्रवस्तुनिसामान्यतोविवादोनास्तिनतस्यस्वरूपतःसाधनमपेक्ष्यते। धर्मस्येव
अयंभावः। चेतनापलापेजगदांध्यप्रसंगादिनाभोक्तृपर्यंतंपदार्थेनकस्यापिविवादस्तस्मात
पुरुषस्यदेहादिव्यतिरेकनित्यत्वादिसिद्ध्यर्थमेवप्रमाणापेक्षानस्वरूपसिद्ध्यैतस्यसर्व
वादिपामरसिद्धत्वात। यथाधर्मसामान्येनकस्यापिविवादःबौद्धैरपितत्याग्निहोत्रादिषु

बुद्धिनिष्ठस्य सादित्वमेव पुंसि · अतएवोक्तं । जाग्रत्स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः । तासां विलक्षणो
जीवः साक्षित्वेन अवस्थित इति । तासां बुद्धीनां साक्षित्वेन विलक्षणो जाग्रदाद्यवस्थारहितो नि
त्य इत्यर्थः । लाघवादात्मैक्यमिति केचित्तन्मतं दूषयति जन्मादिव्यवस्थातः पुरुषबहु
त्वं ॥ १४९ ॥ अपूर्वदेहेन्द्रियादिसंघातसंयोगो जन्म · मरणं तद्वियोगः · जन्ममरणसुखदुःख
बंधमोक्षव्यवस्थातः स्वल्पत्वाग्राह्यहेतोः पुरुषा बहवः । पुण्यः पुण्येन पापः पापेनेति जन्म
व्यवस्था मरणे तद्विदुरमतास्ति भवं त्वयैतरे दुःखमेवाधियंतीति बंधमोक्षव्यवस्था ॥ न
२५ नु पुरुषैक्येऽप्युपाधिरूपावच्छेदकभेदेन जन्मादिव्यवस्था स्यात्तत्राह ॥ उपाधिभेदेऽप्येक
स्य नानायोग आकाशस्येव घटादिभिः ॥ १५० ॥ उपाधिभेदेऽप्येकस्य पुंसो नानोपाधियोगो ॥
स्त्येव आकाशस्य घटमठादिभिरिव · तथा च कायव्यूहादाविवैकस्य नानोपाध्यवच्छेदेन सु
खदुःखादियोगः स्यादित्यर्थः । अतिरिक्त एवोपाधिविशिष्टस्तु तत्राह । उपाधिर्भिद्यते न
तु तद्वान् ॥ १५१ ॥ विशिष्टस्यातिरिक्तत्वे विशेष्यैक्यतानाशे न तन्नाशात्तस्यादिति भावः । उपसं
हरति ॥ एवमेकत्वेन परिवर्तमानस्य न विरुद्धधर्माध्यासः ॥ १५२ ॥ एकत्वेन सर्वतो राम

स्वरूपत्वेपितेजोवद्धर्मिधर्मभावोस्त्वित्याह।निर्गुणत्वान्नचिद्धर्मा।२४६। चिद्धर्मोप्रकाशधर्मोनकिंतुप्र
काशएव॰कुतः।निर्गुणत्वात्॰।गुणसंबंधराहित्यात्॰प्रतीयमानास्त्विंधाद्युपाधिकृतेवेतिभावः।किंच।
पुरुषस्यप्रकाशरूपस्यसंबंधमात्रेणसर्वव्यवहारोपपत्तौप्रकाशरूपधर्मकल्पनायांगौरवम
पि॰तेजसस्तुप्रकाशस्वरूपविशेषग्रहेपिस्पर्शपुरस्कारेणग्रहात्प्रकाशतेजसोर्भेदःसिद्ध्यति
का ५ आत्मनस्तुज्ञानास्यप्रकाशग्रहकालेग्रहणंनास्तीत्यतोधर्मिधर्मभावशून्यंप्रकाशरूपमेवात्म
व ७ द्रव्यंकल्प्यते॰तथाचस्मृतिः।ज्ञानंनैवधर्मोनगुणोवाकथंचन।ज्ञानस्वरूपमेवात्मानित्यःसर्वग बालनो ६
तःशिवइति॰नन्वहंजानामीतिधर्मिधर्मभावानुभवःकथंतत्राह।अनुभवासिद्धस्यनापलापस्तत्प्र
त्यक्षबाधात्।२४७।भवेदेवंयदिकेवलतर्केणात्मानिर्निर्गुणत्वादिचिद्धर्मत्वादिकंप्रसाध्येतनचै। त्वा ५
वं।किंतुसाक्षीचेताकेवलोनिर्गुणश्च।चिन्मात्रोहंसदाशिवइतिश्रुतिस्मृतिसिद्धंतत्॰तथाचश्रु
तिसिद्धस्यनापलापःसंभवति॰किंतुतत्प्रत्यक्षस्यधर्मधर्मिभावविषयकप्रत्यक्षस्यैवभ्रांत॰
निर्गुणत्वादिश्रुतिस्मृतिविरोधः।ननुयदिप्रकाशस्वरूपएवात्मातदासुषुप्त्यादिरवस्थाभेद
स्तस्यनस्यात्प्रकाशात्।तत्राह।सुषुप्तौचसाक्षित्वं।२४८।सुषुप्त्यवस्थायामवस्थात्रय

सां.व.
२६

ज्ञानिभिरेकरूपत्वदर्शनात्. एकात्मवादे बाधकान्तरमाह। वामदेवादिर्मुक्तो नाद्वैतं ॥१५७॥
यद्यपि वामदेवादिर्मुक्तस्तथापि बंधोऽनुभूयतेऽस्माभिर्नास्मैक्यं। वामदेवादेः परमे मोक्षो
न जातः इति शंकायामाह। अनादावद्य यावदभावाद्भविष्यदप्येवं ॥१५८॥ अनादौ कालेऽद्य
यावत्सर्वमोक्षो न जातः कस्यापि तर्हि भविष्यत्कालेऽपि मोक्षशून्यः स्यात् ॥ तत्रानुमानमाह।
इदानीमिव सर्वत्र नात्यन्तोच्छेदः ॥१५९॥ सर्वकालावच्छेदेनात्यन्तोच्छेदाभाववान्कालत्वाद्व
26 र्तमानकालवदिति प्रयोगः। पुरुषस्य यदेकरूपत्वं तत्किं मोक्षकालवृत्त सर्वदेत्याकांक्षायामा
ह। व्यावृत्तोभयरूपः ॥१६०॥ श्रुतिस्मृतिन्यायेभ्यो व्यावृत्ते नित्यनिवृत्ते उभयरूपे उभे रूपे रू
पभेदे इति यावत्। यस्मान्नाया· ननु साक्षित्वस्यानित्यत्वात्कथं सदैकरूपत्वं तत्राह॥ साक्षा
त्संबंधात्साक्षित्वं ॥१६१॥ पुरुषस्य यत्साक्षित्वमुक्तं तत्साक्षात्संबंधात्। ननु परिणामतः
सर्वथा। साक्षाद्द्रष्टरि संज्ञायामिति साक्षिशब्दव्युत्पत्तेः। संबंधश्च प्रतिबिंब एव न तु संयोगमा
त्रं अतिप्रसंगात् स च तत्त्वबुद्धावेवास्तीति तद्बुद्धेरेव साक्षी नान्येषां तु द्रष्टेति बोध्यं। अत एव सं
बंधात्साक्षित्वमिति पाठे अत्र संबुद्धिः करणत्वसाम्यान्मात् विशेषान्तरमाह सत्त्वाभ्याम्। राम

२६

न
धर्मिस्ययोविरुद्धसुखदुःखाध्यासस्तदापत्तिः।सैवंसतिपुरुषबहुत्वेसतिनेत्यर्थः।नन्वात्मनोनि
र्धर्मकत्वात्सुखादीनांबुद्ध्यादिधर्मत्वाच्चनसांकर्यमतआह॥अन्यधर्मत्वेपिनारोपात्तत्सिद्धि
रेकत्वात्॥१५३॥बुद्धिधर्मत्वेपिसुखादीनांआरोपात्पुरुषेव्यवस्थानसंभवति।आरोपा
धिष्ठानस्यैकत्वात्।नहिस्फटिकेकेआरोपितानांनीलपीतादीनांनीलोयंपीतोयमितिव्यव
स्थासंभवति।घटाकाशादीनांतुउपाधिभेदेनभिन्नानांऔपाधिकभेदव्यवस्थाघटतेइतिभा। ५२
वः।नन्वेवमेवहिभूतात्माभूतेभूतेव्यवस्थितः।एकधाबहुधाचैवदृश्यतेजलचन्द्रवदित्यादीनां
कागतिस्तत्राह।नाद्वैतश्रुतिविरोधोजातिपरत्वात्॥१५४॥नास्मन्मतेऽद्वैतश्रुतिविरोधःकु
तःजातिपरत्वात्तासां।जातिसामान्यमेकरूपतेतियावत्।जातिपदस्यैकरूपताप्रतिपादक
त्वमग्रिमसूत्राल्लभ्यते।नन्वेकरूपत्वमपिपुरुषस्यद्वैतविसंवंनत्वयमुक्तंजातिपरत्वादिनित
त्राह।विदितबंधकारणस्यदृष्ट्यातद्रूपं॥१५५॥विदितंस्पष्टंबंधकारणमविवेकोयेनतस्य
पुरुषस्यदृष्ट्यैवपुरुषेष्वतद्रूपंरूपभेदःस्मर्यः।तथाप्यनुपलंभोदेकरूपतायाएवाभावस्त
त्राह।नांधादृष्ट्याचक्षुष्मतामनुपलंभः॥१५६॥अनुपलंभमात्रंनासिद्धंदैरदर्शनेपि

कृतासंदर्भशुद्धिश्चेत्सेवंते ना फलः श्रमः ॥ इति श्रीस्वयंप्रकाशतीर्थशिष्यवेदान्तिसत्यदे
२७ न महादेवेनोन्नीते सांख्यवृत्तिसारे प्रथमोऽध्यायः ॥१॥ एवं प्रथमेनाध्यायेन शास्त्रस्य विष
यो निरूपितः पुरुषस्यापरिणामित्वोपपादनाय तु प्रकृतितः सृष्टिप्रक्रियाभिधास्यते वि
स्तरेण द्वितीये । तत्रैव च प्रकृतिकार्याणां स्वरूपमभिव्यक्तं । अंते भोगापि पुरुषस्य स्फुटविवेका
य । अत एव विकारं प्रकृतिं चैव पुरुषं च सनातनं । यो यथावद्विजानाति स वितृष्णो विमुच्यत इ
ति मोक्षधर्मसूत्रपाणां शेषत्वोक्तिः । तत्रादावचैतन्याः प्रकृतेर्निःप्रयोजनत्वे मुक्तस्यापि त६
27 बंधप्रसंग इत्याशंक्य जगत्सृष्टेः प्रयोजनमाह । विमुक्तमोक्षार्थं स्वार्थं वा प्रधानस्य ॥१॥ कर्तृत्व सार्थ८
मिति पूर्वाध्यायांत्यसूत्रादनुषज्यते । स्वभावतो दुःखबंधाद्विमुक्तस्य पुरुषस्य प्रतिबिंबरू
पदुःखमोक्षार्थं अथवा स्वार्थं स्वस्य पारमार्थिकदुःखमोक्षार्थं प्रधानस्य जगत्कर्तृत्वमि
त्यर्थः । यद्यपि मोक्षवद्भोगोऽपि सृष्टेः प्रयोजनं तथापि मुख्यत्वान्मोक्षस्यैवोक्तिः । ननु मो
क्षार्थं चेत् सृष्टिस्तर्हि सकृत्सृष्ट्यैव सर्वेषां मोक्षसंभवे पुनः पुनः सृष्टिर्न स्यात् तत्राह ।
विरक्तस्य तत्सिद्धेः ॥२॥ नैकदा सृष्ट्या मोक्षः किंतु बहुशो जन्ममरणव्याध्यादिदुःखेन भृ
शं तप्तस्य ततश्च प्रकृतिपुरुषयोर्विवेकख्यातौ त्यक्तपरवैराग्यस्यैव मोक्षो नेतरस्य राम २७

नित्यमुक्तत्वं॥१६२॥ औदासीन्यं चेति॥१६३॥ सदैव पुरुषस्य दुःखाद्यसंबंधशून्यत्वं दुःखा
देर्बुद्धिपरिणामत्वात्। औदासीन्यमकर्तृत्वं चेतनमित्यकामत्वादिकं। कामः संकल्प इत्यादि
श्रुतेः इति पुरुषधर्मसमाप्त्यर्थः। नन्वेवं प्रकृतिपुरुषयोरन्योन्यं वैधर्म्येण विवेके सि
द्धे पुरुषस्य कर्तृत्वं बुद्धेर्ज्ञातृत्वं च कथं व्यवह्रियत इत्याशंक्याह। उपरागात्कर्तृत्वं चित्सान्नि
ध्याच्चित्सान्निध्यात्॥१६४॥ अत्र यथायोग्यमन्वयः। पुरुषस्य यत्कर्तृत्वं तद्बुद्ध्युपरा
गात्॥ बुद्धेश्च या चित् सा पुरुषसान्निध्यात्। एतदुभयं न वास्तवं। यथाग्न्ययसोः
परस्परं संयोगविशेषात् परस्परधर्मव्यवहार औपाधिको यथा वा जलसूर्ययोर्योगात् संयो
ग्यस्य धर्मारोपस्तथैव बुद्धिपुरुषयोरिति भावः। एतदेवेश्वरकृष्ण आह। तस्मात्त
त्संयोगादचेतनं चेतनावदिव लिंगं। गुणकर्तृत्वे च तथा कर्त्तेव भवत्युदासीन
इति॥ वीप्साऽध्यायसमाप्त्यर्था। अत्र नामकसंदर्भे नास्तिकापि स्वतंत्रो इति नाय। ता २
मितुं वृत्तिसार इत्यभिधा कृता। परवाक्यानि लिखितानि तत्सामर्थ्यं विभावितः

तिपुरुषयोरत्यासत्तेर्योगमेदाभिप्रायेणेन स्तुतेर्योजनेति भावः॥ ननु प्रकृतेरपि वास्तवं स्वरूपं कुतः सिद्धः स्व
प्नतुल्यत्वस्य तत्र तत्रावगमादित्यत आह। कार्य्यतस्तत्सिद्धेः॥१८॥ अर्थक्रियासमर्थादित्यादिः॥ अर्थक्रिया
कारित्वेन कार्याणां वास्तवत्वात्तत्स्वरूपत्वमपि वास्तवं सिद्ध्यति॥ स्वप्नादितुल्यता श्रुतिस्तु अनित्यत्वपरेति
भावः॥ ननु प्रकृतेः स्वार्थत्वपक्षे मुक्तपुरुषं प्रत्यपि प्रवृत्तिः स्यादत आह। चेतनोद्देशान्नियमः कण्टक
मोक्षवत्॥१९॥ चेतनं चेतनो विवेकसाक्षात्कारवानित्यर्थः तस्योद्देशात्तं प्रतीत्यर्थः प्रकृतेर्नियमः प्रवृत्त्य
भावः यथा कण्टकाभिज्ञं प्रति मोक्षः दुःखप्रयोजकत्वाभावः प्रकृतेर्हि स्वनिष्ठदुःखमोक्षार्था प्रवृ
२४ त्तिर्व्यासश्च विवेकि पुरुषसंबंधे सति जात एव। इदमेव हि प्रकृतेर्दुःखस्वरूपत्वं यद्दुःखात्मक बु त
द्धिप्रतिबिंबरूप दुःखभोगस्य पुरुषनिष्ठस्य प्रयोजकत्वं। तच्च विवेकिपुरुषस्य दुःखभोगाभा
वे सति गतमेवेति स्वनिष्ठप्रयोजनवत्वा[illegible]भावान्मुक्तपुरुषं प्रति न प्रवर्त्तते किं त्वमु
क्तपुरुषं प्रत्येवेति भावः॥ ननु पुरुषस्य स्वच्छत्वमप्यसत्त्वमित्युक्तं तन्न युक्तं प्रकृतिसंयोगेन पुरुषस्य
परिणामोचित्यात्। दृष्टो हि दध्यम्लादियोगेन काष्ठादेः घृताम्लादि सदृशः परिणामस्तत्राह॥ अन्य
योगेपि तत्सिद्धिर्नाञ्जस्येनायोदाहवत्॥२०॥ प्रकृतियोगेपि पुरुषस्य आंजस्येनान ध्यम्पस्तत पानस्व

र्थः सकलसत्यावैराग्यासिद्धौ हेतुमाह। न श्रवणमात्रात्तत्सिद्धिरनादिवासनापटुत्वात्।२। श्रवण
मपि बहुजन्मकृतपुण्येन भवति। तत्रापि श्रवणमात्रान्नवैराग्यसिद्धिः किंतु साक्षात्कारात्। सा
क्षात्कारश्च न झटिति भवति अनादिमिथ्याज्ञानवासनाप्राबल्यात्। किंतु योगनिष्पत्त्या
गे च विलंबात्कल्पमतो वा जन्मांतरे वैराग्यं मोक्षश्च न स्यात्। चिरकालाच्चेदेव भवतीति भावः। स
चिरप्रवाहे हेत्वंतरमाह। बहुभृत्यवद्वा प्रत्येकं।४। यथा गृहस्थानां बहवो भर्तव्या भवन्ति एवं प्र
धानस्यापि असंख्याः पुरुषा विमोचनीया अतः किं प्रतीमोक्षेपि अन्येषां मोक्षार्थं स्व
चिरप्रवाहः पुरुषाणामानंत्यात्। अतएव योगसूत्रं। कृतार्थं प्रति नष्टमप्यनष्टं तदन्य
साधारणत्वादिति। ननु कथं प्रकृतेरेव स्वच्छत्वं आत्मन आकाशः संभूत इति पुरुषस्यापि
स्वच्छत्वोक्तेस्तत्राह। प्रकृतिवास्तवे च पुरुषस्याध्याससिद्धिः।५। प्रकृतौ वास्तवे स्वच्छत्वे सि
द्धे सति पुरुषस्य स्वच्छत्वाध्याससिद्धिः। अजामेकामित्यादिश्रुतेः पुंसां कूटस्थाचेतनात्तावा
ध्यकश्रुतेश्च पुरुषस्य स्वच्छत्वमुपासनार्थमेव श्रुतावुच्यते। अतएव कौर्मे शक्तिशक्ति
मतोर्भेदं पश्यंति परमार्थतः अभेदं चानुपश्यंति योगिनस्तत्त्वचिंतका इति भेदं अन्यो
न्याभावं अभेदं त्वविभागरूपं प्रकृत्यादितत्त्वोपासकाः पश्यंतीत्यर्थः। तथा च प्रले

जन्यत्वव्यवहारः। अथ महदादीन् दर्शयति। अध्यवसायो बुद्धिः॥१३॥ महत्तत्त्वपर्यायो बुद्धिरिति। अध्यवसाय

सा०

२९ श्चयेसायं स्वनिश्चयाख्यमस्त्यस्यासाधारणीवृत्तिरित्यर्थः। महत्तत्त्वस्यापरानपि धर्मानाह। तत्का
र्यं धर्मादि॥१४॥ धर्मज्ञानवैराग्यैश्वर्याण्यपि बुद्ध्युपादानकानि नाहंकाराद्युपादानकानि। बु
द्धेरेव निरतिशयसत्त्वकार्यत्वात्। नन्वेवं नरपश्वादिगतानां बुद्ध्यंशानामधर्मप्राबल्यं कथं
तत्राह। महदुपरागाद्विपरीतं॥१५॥ तमेव महत्तत्त्वं रजस्तमोभ्यामुपरागात् विपरीतं तुच्छं
अधर्माज्ञानावैराग्यानैश्वर्य्यधर्मकमपि भवति। नन्वेवं धर्माद्यवस्थानार्थं बुद्धेरपि नित्य
२३ त्वात्कथं कार्यतेति चेत्। अत्राहुरभियुक्ताः। प्रकृत्यंशरूपबीजावस्थमहत्तत्त्वे सत्त्वविशेषे
कर्मवासनादीनामवस्थानात्। तस्यैव ज्ञानकारणावस्थया अंकुरवदुत्पत्त्यंगीकारात्। त
था च नित्यानित्योभयरूपा बुद्धिः तत्रापि कारणावस्थबुद्धौ प्रकृतिव्यवहार एव न तु बुद्धि
व्यवहारो बुद्धिलिंगाध्यवसायाद्यभावादिति। महतः कार्यमहंकारं लक्षयति। अभि
मानोहंकारः॥१६॥ अहं करोतीत्यहंकारो धर्मी। तस्याभिमानोऽसाधारणवृत्तिः। असा
धारणतासूचनायैव धर्मधर्मिणोरभेदोक्तिः। बुद्ध्या निश्चितेऽर्थे ह्यहंकारममका
रौ जायेते। अतो वक्ष्यमाणः कार्यकारणभावानुसारेण वृत्तिवृत्तिमतोरपि कार्यकारणभाव उन्नी

ष्टृत्वसिद्धिः यथाग्निः संयुक्तायसो दग्धृत्वं किंतु स्वसंयुक्तप्रकृतिद्वारकं न साक्षात् एवं सृष्टृ
त्वं स्वसंयुक्ताग्निद्वारकमयसो दग्धृत्वं । दृष्टान्ते तु भयोः परिणामः प्रत्यक्षसिद्धत्वादिष्यते । संदि
ग्धे त्वेकस्यैव परिणामेनोपपत्तावुभयोः परिणामकल्पनं गौरवमिति भावः । सृष्टेर्मुख्यनिमि
त्तकारणमाह । रागविरागयोः सृष्टिः ।९। रागे सृष्टिः विरागे वैराग्ये योगः स्वरूपेवस्थानं
मुक्तिरिति यावत् तथा चान्वयव्यतिरेकाभ्यां सृष्टौ रागकारणं । रागो वैराग्यं चापि प्रकृतिधर्मो
न तु पुरुषस्येति बोध्यं । अथ सृष्टिप्रक्रिया । महदादिक्रमेण पञ्चभूतानां ।१०। सृष्टिरिति पूर्वसूत्रा ला
दनुवर्तते । क्रमस्तूक्त एव । प्रकृतिनित्यत्वस्थूलत्वमहदादिनित्यत्वस्थूलत्वविशेषमाह । आत्मार्थ
त्वात्सृष्टेर्नैषामात्मार्थ आरंभः ।११। एषां महदादीनां सृष्टेः सृष्टेः सृष्टत्वस्यात्मार्थत्वात् पुरुष
भोगार्थत्वात् न स्वार्थ आरंभः सृष्टत्वं विनाशित्वेन मोक्षापगमात् । ननु दिक्कालौ सकलव्य
वहारसिद्धौ कुतो न गणितौ तत्राह । दिक्कालावाकाशादिभ्यः ।१२। आदिशब्देनोपाध्ययोग
ह्यन्ते । तथा च तत्तदुपाधिभ्य आकाशान्नदिक्कालावुत्पद्येते इत्यर्थः । पटघटाद्युपाधिविशिष्टा
काश एव दिक्कालौ तयापि विशिष्टस्यातिरेकविशेषणविशेष्योभयजन्यत्वं चा

वाक्याद स्ती॰ अनुमीयते॰ अन्नमयत्वादिश्रुतिस्तु अन्नलक्षणतद्गुणत्वाद्धेया॰ तथाप्यग्निर्वाग्भूत्वेति वाते प्राणश्च
क्षुरादित्यश्च इत्यादिश्रुतिषु देवतालिङ्गित्र्येलवानेकेलिङ्गस्य चकारस्ते स्वैवचितया देवतावादानकेत्वं स्यान्नत्राह। देव
तालयश्रुतिर्नाशं भवत्यस्य ॥२२॥ साच श्रुतिर्नाशं च विपरीता मनाशं न केपि भूतले जलबिन्दोर्लयदर्शनात्।
मनो नित्यमिति केचित्तन्नत्याह ॥ तदुत्पत्तिश्रुतेर्विनाशदर्शनाच्च ॥२३॥ एतस्माज्जायते प्राणो मनः सर्वेन्द्रिया
णि चेत्युत्पत्तिश्रुतेः। दृश्यते अवस्था सुप्तदशादीनां चिन्ता मनसाप्ययप्रयादिना विनाशश्रुतिरेवास्य मनो
३० नित्यमिति शेषः। आत्मवत् मनसेन्द्रियमिति नास्ति न मतमपाकरोति। अतीन्द्रियमिन्द्रियं भ्रान्तानामधिष्ठा
ने ॥२३॥ सर्वमिन्द्रियं अतीन्द्रियं भ्रान्तानां भवतु अधिष्ठाने गोलके इन्द्रियमिति बुद्धिः। क्वचिदधिष्ठानमि
मेवं ति पाठः। एवं इन्द्रियं शक्तिभेदाद्गोलकमेकानेककारीति मतं प्रत्याह। शक्तिभेदेपि भेदसिद्धौ ने
कत्वं ॥२४॥ एकस्येन्द्रियस्य शक्तिभेदस्वीकारेपीन्द्रियभेदः सिद्ध एव शक्तीनामपीन्द्रियत्वात्। अतो
नेकत्वमिन्द्रियस्य। न च नानेन्द्रियकल्पना गुर्वीत्याह। न कल्पनाविरोधः प्रमाणदृष्टस्य ॥२५॥ सप्र
ष्ट॰। विरोधमाह। उभयात्मकं च मनः ॥२६॥ मनोध्यवसानं विना इन्द्रियाणां व्यापारासमत्वात्। मनस्
वज्ञानेन्द्रियं कर्मेन्द्रियमिति चोच्यते॰ अन्यत्रमना अभूवं नाद्राक्षमन्यत्रमना अभूवं नाश्रौषमि ।म

यत इत्यभियुक्ताः। अन्तःकरणमेकमेव बीजांकुरमहाचक्षुरादिवदवस्थात्रयमात्रभेदात् कार्यकार
णभावमापद्यते। अत्र च वायुपुराणम्। मनो महान्मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्व
र इति मनोबुद्ध्योः पर्यायत्वमुक्तमिति। अहंकारस्य कार्यमाह। एकादशपंचतन्मात्रं तत्का
र्यं।२४। एकादशेन्द्रियाणि शब्दादिपंचतन्मात्रं चाहंकारस्य कार्यं तत्रापि रूपरागादयमूर्च्छद्विरि
त्याद्युक्तेः एष धर्मकं मन एवादावहंकारादुत्पद्यते इति विशेषः। तन्मात्रादीनां राजका
र्यत्वादित्यभियुक्ताः। अत्रापि विशेषमाह। सात्त्विकमेकादशकं प्रवर्त्तते वैकृतादहंकारात्।२५।
एकादशानां पूरणमेकादशं तदेव एकादशकं षोडशात्मकगणमध्ये सात्त्विकं अतस्तान् वैकृता
त्सात्त्विकात् अहंकाराज्जायते। राजसादिन्द्रियाणि तमसात्पंचतन्मात्राणीत्येवं गंतव्यं। एका
दशेन्द्रियाणि दर्शयति। कर्मेन्द्रियबुद्धीन्द्रियैरान्तरमेकादशकं॥२६॥ वाक्पाणिपादपायूप
स्थाः कर्मेन्द्रियाणि। चक्षुः श्रोत्रं त्वग्रसनघ्राणानि ज्ञानेन्द्रियाणि एतैः सहान्तरं मन
इत्येकादशकं एकादशेन्द्रियाणि। इंद्रियाणां भौतिकत्वं प्रत्याचष्टे। अहंकारिकत्व
स्मृतेर्न भौतिकानि।२७। इंद्रियाणीति शेषः। अहंकारिकत्वस्मृतिश्च कात्तेनत्तुष्ट्याचार्य

क्लिष्टाक्लिष्टाः ३३ क्लिष्टा अक्लिष्टा वा भवन्तु वृत्तयः परं तु पंच तय्यः ६

वः त्रयस्यासाधारणी वृत्तिमाह ॥ सामान्यकरणवृत्तिः प्राणाद्या वायवः पंच ॥३१॥ प्राणादिरूपाः
पंचवायुवत्संचाराद्वायव इति प्रसिद्धास्ते सामान्यासाधारणीकरणस्यान्तःकरणत्रयस्य
वृत्तिः परिणामभेदा इत्यर्थः किंच वैशेषिकाणामिवास्माकं नायं नियमो यदेंद्रियवृत्तिः
क्रमेणैव भवति नैकदेत्याह ॥ क्रमशोऽक्रमशश्चेन्द्रियवृत्तिः ॥३२॥ जातिसांकर्यस्यास्माकं
मते दोषत्वाभावान्नीसमवधाने सत्यनेकेंद्रियैरेकक्षणोत्पादने बाधकं नास्तीति भावः बुद्धिवृ
त्तीनामेव संसारनिदानताप्रतिपादनाय तमादौ संकलय्य बुद्धिवृत्तीर्दर्शयति ॥ वृत्तयः पंचतय्यः∨
32 पंचप्रकारा एव नाधिकाः क्लिष्टा दुःखदाः सांसारिकवृत्तयः अक्लिष्टाश्च तद्विपरीता योग
कालीनवृत्तयः ॥ वृत्तीनां पंचप्रकारत्वं पातंजले उक्तं प्रमाणविपर्ययविकल्पनिद्रास्मृतय इति
उक्तवृत्तिनिवृत्त्यापि पुरुषस्वरूपं परिचाययति ॥ तन्निवृत्तावुपशान्तोपरागः स्वस्थः ॥३४॥ ता
सां वृत्तीनां विरामदशायां शान्तितत्प्रतिबिम्बकः स्वस्थो भवति कैवल्यद्भान्यदायीत्यर्थः तथा च
योगसूत्राणि योगश्चित्तवृत्तिनिरोधः ॥ तदा द्रष्टुः स्वरूपेवस्थानं ॥ वृत्तिसारूप्यमितरत्रेति ॥
एतदेव दृष्टान्तेनाह ॥ कुसुमवच्च मणिः ॥३५॥ यथा जपाकुसुमे सति मणिः सरक्तो भवति तन्नि

त्वादिस्तुतेः एकमनःपरिणामरूपे ज्ञाने कथं नानात्वमत आह ॥ गुणपरिणामभेदान्नानात्वमव
स्थावत् ॥२७॥ गुणादीनां सत्त्वादीनां परिणामश्चतूरूपः तेषां भेदात् नानात्वं नानाविधत्वं ज्ञा
ने चाद्यर्थादिव्यक्तिप्रयुक्तं चानुवर्त्यादिकमादाय मनःपरिणामभूत एव ज्ञाने चादृष्टं स्त्रो
सं द ४ तमित्यादिर्व्यवहारः यथा एकस्मिन्नेव देहे तत्तल्लोकयोगानुपयोगप्रयुक्ताः कृशत्वपुष्टत्वाद
यो व्यवस्थाः इत्यर्थः ज्ञानकर्मेन्द्रिययोर्विषयमाह ॥ रूपादिरसमलान्त उभयोः ॥२८॥ अन्नरसा
नां मलः पुरीषादिः तथा च रूपरसगन्धस्पर्शशब्दाः वचनादानविहरणानन्दयितव्योत्स्र
ष्टव्याश्च क्रमेण उभयोर्विषयाः आनन्दयितव्यं चोपस्थस्य पाय्वन्तरमिति केचित् इन्द्रियाणि
कस्योपकारकारीत्यपेक्षायामाह ॥ द्रष्टृत्वादिरात्मनः करणत्वमिन्द्रियाणां ॥२९॥ द्रष्टृत्वा
दि पञ्चकं वक्तृत्वादिपञ्चकं संकल्पयितृत्वं चात्मनः पुरुषस्य दर्शनादिवृत्तौ करणत्वं त्विन्द्रिया
णामित्यर्थः इदानीमन्तःकरणत्रयस्यासाधारणवृत्तिमाह ॥ त्रयाणां स्वालक्षण्यं ॥३०॥ स्वं ल
क्षणमेव लक्षणमसाधारणवृत्तिर्येषां ते तेषां भावः स्वालक्षण्यं मध्यमपदलोपी समासः
तथा चाध्यवसायो बुद्धेः अभिमानोऽहंकारस्य संकल्पो मनसः असाधारणवृत्तय इति मा

त्रिगुणयोगात् । [illegible]त् । एवं तु [illegible] पुरु[illegible] प्रा[illegible]कलापोग[illegible] [illegible]त्वात् मुख्यं करणत्वं । अन्येषु
तु पुरुषार्थसाधकत्व मत्वगुणयोगात् । अमुख्यं करणत्वमित्येतयोरप्याहारः । अपि तु बुद्धावेव मुख्यं
करणत्वमिति भावः । नन्विंद्रिया[illegible]त्वादहंकारोपि मुख्यं करणं स्यान्न बुद्धिरेवेत्यत आह । द्वयोः
प्रधानं मनो लोकवत् भृत्यवर्गेषु ॥ ४० ॥ द्वयोर्बुद्ध्यहंकारयोर्मध्ये मनो बुद्धिरेव प्रधानं मुख्यं करणं
पुरुषेऽर्थसमर्पकत्वात् । यथा भृत्यवर्गेषु कश्चिदेव लोकः प्रधानो भवति राज्ञोऽमात्यस्तद्वत् सर्वजन
३२ भूतात्मा सा[illegible]त्वाद्बुद्धेः प्रधानत्वे हेत्वन्तरं त्रिभिः । अव्यभिचारात् ॥ ४१ ॥ सर्वकरणव्या
वा८ पकत्वात् फलाव्यभिचारा[illegible]त् । तथाशेषसंस्काराधारत्वात् ॥ ४२ ॥ बुद्धिरेव सर्वसंस्कार
[illegible]णामाधारः न च शरीरादिः पूर्वदृष्टस्मृताद्यर्थानामंधबधिरादिभिः स्मरणानुपपत्तेः । ना
प्यहंकारमनसी तत्त्वज्ञानेनाहंकारमनसोर्लयेपि स्मरणादर्शनात् । अतो बुद्धिरेव प्रधानं । स्म
त्यानुमानाच्च ॥ ४३ ॥ स्मृत्या चिंतनरूपया वृत्त्या प्रधान्यानुमानात् । चिंतावृत्तिर्हि ध्यानाख्या
सर्ववृत्तिभ्यः श्रेष्ठा तदाश्रयत्वमपि चित्तपरनाम्नी बुद्धिः श्रेष्ठेत्यवगम्यते । ननु चिंतावृत्तिः
पुरुषस्यैवास्तु नेत्याह । संभवेन्न स्वतः ॥ ४४ ॥ स्वतः स्मृतिर्न संभवेत् कूटस्थत्वात् । ननु बुद्धेरेव प्रा
धान्ये मनसस्तत्त्वीयात् करणस्य प्राधान्यं पूर्वकथितं तत्कथमत आह ॥ आपेक्षिको गुणप्रधान   राम

वृत्तौ च रागाद्यन्यः स्वस्थो भवति तद्वत्। उक्तं। यथा संलग्नतेरक्तैः केवलः स्फटिको जनैः। रंजका-
द्युपधानेन तद्वत्परमपूरुष इति। ननु कस्य यत्नेन करणानि प्रवर्त्तंते न पुरुषस्याकर्तृत्वात्त-
स्य नेश्वरस्यानभ्युपगमात्तत्राह॥ पुरुषार्थं करणोद्भवोऽप्यदृष्टोल्लासात्॥३६॥ पूर्धान प्रवृत्ति-
वत् पुरुषार्थं करणानामुद्भवः प्रवृत्तिरपि पुरुषस्यादृष्टाभिव्यक्तेरेव भवति। अदृष्टं चो-
पाधेरेवेति बोध्यं॥ परार्थं स्वतः प्रवृत्तौ दृष्टान्तमाह॥ धेनुवद्वत्साय॥३७॥ यथा वत्सार्थं धे-
नुः स्वरणया धेनुपयोऽचेतनमपि स्वयमेव स्रवति नान्यं यत्नमपेक्षते तथैव पुरुषस्य
कृते करणानि। दृश्यते च सुषुप्तात्स्वयमेव बुद्धेरुत्थानमिति। ईश्वरकृष्णोऽप्याह। पुरुषार्थ
एव हेतुर्न केनचित्कार्यते करणमिति। करणानि कियन्तीत्याकांक्षायामाह॥ करणं त्रयोद-
शविधं अवान्तरभेदात्॥३८॥ मनोहंकारो बुद्धिरित्यन्तःकरणत्रयं बाह्यानि च दशेति त्र-
पि३ योदशकरणानि। तत्राप्यवान्तरभेदेनानन्त्यं यदि पादादिपितु विध्यमित्युक्तं। ननु बुद्धेरन्येषां च समा-
नमेव करणत्वं तात्त्विकं किं विशेषोक्तीत्याह। इन्द्रियेषु साधकतमत्वगुणयोगात्कुठा-
रवत्॥३९॥ फलायोगव्यवच्छिन्नस्यैव करणत्वात् बहिरन्तरच्छिन्नं प्रति मुख्यत्वं कुठारेतु के साधन।

सा० द०
३३

मूलसूक्ष्मात् विशिष्टस्य महाभूतस्यारम्भः ... स्य भोग देहस्य ... भवत्युत्पद्यते । शरीरारम्भकार
णमाह । तद्बीजात्संसृतिः ॥४॥ तस्य शरीरस्य बीजात् कारणात् सूक्ष्मदेहाद्वा संसृतिस्तत्तद्देहावच्छिन्नस्य
स्वदुःखोपभोगादिरूपा । ननु भूतसूक्ष्माणामारम्भकत्वमित्यर्थः । ननु विवेकिनं प्रत्यारम्भकत्वमस्तु
प्रलयेऽपि तं प्रत्यारम्भकत्वं कुतो नेत्यत आह ॥ उपभोगादितरस्य ॥५॥ इतरस्याविवेकिन उपभोगात् उ
पभोगसमाप्तेः पूर्वस्य भोगप्रदकर्मणो नाशे प्रलय इति भोगाभावे किमर्थं शरीरमिति भावः ।
३३ सम्बन्धे पुनरारम्भकत्वं कथं तत्राह । सम्प्रति परिमुक्तो द्वाभ्याम् ॥६॥ सम्प्रति सृष्टिकाले द्वाभ्यां धर्माधर्मा
भ्यां परिमुक्तो बद्ध इत्यर्थः । प्राक् पूर्वस्येव वर्तिपूर्वस्यापि बन्धनादित्वात् । प्रलये सुषुप्तेः धर्माधर्म
योः सृष्टिकाले फलोन्मुखयोः शरीरमारभ्यते । मुक्तौ तु धर्माधर्मयोर्नाश एवेति भावः । स्थूलसूक्ष्म
शरीरयोर्वैलक्षण्यमाह ॥ मातापितृजं स्थूलं प्रायश इतरन्न तथा ॥७॥ स्थूलमपि किंचन मातापि
तृजं न भवतीति प्रायश इत्युक्तम् । न तथा न मातापितृजम् । तयोरेव तयोर्मध्ये भोगव्यवस्थामाह ॥
पूर्वोत्पत्तेस्तत्कार्यत्वं भोगादेकस्य नेतरस्य ॥८॥ पूर्वोत्पत्तेः सूक्ष्मशरीरस्य तत्कार्यत्वं स्थूलशरी
रस्य भोगादिति पञ्चमी प्रथमार्थे । भोग एकस्य सूक्ष्मस्य नेतरस्य स्थूलस्याभूतशरीरे भोगाद्दर्शं ।

राम
३३

नाव: क्रियाविशेषात् ॥४५॥ क्रियाविशेषं प्रति कारणानां नानापेक्षित्वोऽगुणप्रधानभावः । चक्षुरादि
व्यापारेषु मनः प्रधानं मनोव्यापारे अहंकारोऽहंकारव्यापारे च बुद्धिरित्यर्थः । अस्य पुरुषस्येदमेव बु
द्ध्यादिकरणं नान्यदिति । व्यवस्थामुपपादयति । तत्कर्मार्जितत्वात्तदर्थमभिचेष्टा लोकव
त् ॥४६॥ यत्पुरुषकर्मार्जितं यत्करणं तदर्थं तस्य प्रवृत्तिः । यथा लोके यत्पुरुषकर्मणा क्रयादिना
र्जितो यो दासादिस्तस्य तत्पुरुषार्था प्रवृत्तिः यद्यपि पुरुषस्य कर्मापि नास्ति तथापि पुरुषभोगसा
धनतया पुरुषस्वामिकत्वेन राज्ञो जयादिवत्पुरुषस्य कर्मोपपन्नत्वमेव । कर्मणस्तत्पुरुषीयत्वे
किं नियामकमिति चेत् । तथाविधं कर्मान्तरमेवानादित्वात्तु नानवस्थादोषायेत्यभिप्रायः । बु
द्धेः प्राधान्यमुपसंहरति । समानकर्मयोगे बुद्धेः प्राधान्यं लोकवल्लोकवत् ॥४७॥ सर्वेषां करणानां
समानेऽपि कर्मजन्यत्वे उक्तप्राधान्यहेतुभिर्बुद्धेरेव प्राधान्यं यथा लोके विवाहादिक्रियायोगसा
म्येऽपि कश्चिदेव नायिकाप्रधानं । प्राधान्यप्रयोजकगुणोऽन्यो नास्तीत्युक्तं ॥ वीप्सा ध्यायसमा
प्तौ ॥ इति श्रीवेदान्तिमहादेवोन्नीते सांख्यप्रवचनवृत्तिसारे द्वितीयोऽध्यायः ॥२॥२९॥ प्रधान
कार्याणि रूपणानंतरं वैराग्यार्थं तत्त्वाभ्यासारंभः ॥ अविशे[illegible]द्विशेषारंभः ॥१॥ अविशेषात्

स्नुतेरपि नात्मत्वमित्याह तदन्नमयत्वश्रुतेश्च ।१५। अन्नमयं हि सोम्य मन इति श्रुतेः प्रधानस्यैव मू
तसूक्ष्माणामपि प्रवृत्तिः पुरुषार्थैवेत्याह ॥ पुरुषार्थं संसृतिर्लिंगानां सूपकारवद्राज्ञः ।१६। संसृतिः
प्रवृत्तिः लिंगानां मूलसूक्ष्माणां । पांचभौतिको देहः ।१७। चातुर्भौतिकमित्येके ।१८। एकभौतिकमि
३४ त्यपरे ।१९। स्वप्नादि · उत्तरयोः शरीरविशिष्ट · देहाकारपरिणतानां भूतानां चैतन्यं धर्म इति निरस्य
ति । न सांसिद्धिकं चैतन्यं प्रत्येकादृष्टेः ।२०। स्वाभाविकं धर्मं भूतं मिलितानां हि तदा भवेत् यदि प्र
वि त्येकं चिद्दृश्येत । प्रपंचमरणाद्यभावश्च ।२१। देहस्य चैतन्ये तस्यैवात्मत्वे च प्रपंचस्य धर्माधर्म
योः मरणस्य देहवियोगरूपस्यादर्शनात् देहान्तरसंयोगस्य चाभावः प्रसज्येत् · न चेष्टाप
त्तिः सर्वस्य प्रामाणिकत्वात् · यथा प्रत्येकमदर्शने अपि बहवो मादकपदार्था मदशक्तिमुद्भाव
यंति तथा भूतानि मिलितानि चेतयंते इत्यत आह । मदशक्तिवच्चेत् प्रत्येकपरिदृष्टे सांहत्या
सांहत्ये तदुद्भवः ।२२। बंधहेतुमाह । बंधो विपर्ययात् ।२४। विपर्ययात् अज्ञानात् · ज्ञानकर्मणो ना३
र्वैयर्थ्यमत आह । नियतकारणत्वान्न समुच्चयविकल्पौ ।२५। ज्ञानं मुक्तिहेतुः कर्म अमुक्तिहेतुः
अतो मुक्तौ न ज्ञानकर्मणोः समुच्चयः न वा विकल्पः । ननु भा[illegible]काम्यकर्मणां समुच्चयो नि राम

नादित्यर्थः ॥ लिंगशरीरस्व[illegible]रूपमाह । सप्तदशैकं लिंगं ॥१९॥ सप्तदशैकं चेति समाहारद्वंद्वः बु
द्ध्यहंकारमनांसि पंचसूक्ष्मभूतानि दशेन्द्रियाणीति सूक्ष्मं लिंगमिति चोच्यते । सूक्ष्मदेहस्य सर्वत्र
तुल्यत्वात् स्थूलवैसादृश्यं कुत इत्यत आह । व्यक्तिभेदः कर्मविशेषात् ॥२०॥ व्यक्तयः स्थूलदेहाः भेदो
वैलक्षण्यं देहेऽहमितिवादः कथं तत्राह । तदधिष्ठानाश्रये देहे तद्वादात्तद्वादः ॥२१॥ तदित्यात्मपराम
र्शः पूर्वस्मात् पूर्वस्मादहमितिवादात् उत्तर उत्तरोऽहमितिवादः वाद इत्यभेदेन देहेऽहमिति ज्ञानस्य उक्त
मत्वमाह । आत्मनो देहातिरिक्तत्वात् । देह एवाहंप्रत्ययविषयोऽस्तु तस्यैवात्मत्वादिति निरस्यति
न स्वातंत्र्यात् तदृते [illegible] छायावच्चित्रवच्च ॥२२॥ न हृते आत्मसत्त्वं विना स्वयमेव देहो नाहंप्रतीतिविष
यः मृतदेहेप्यहमिति प्रत्ययापत्तेः यथा वरकं विना न छाया भित्तिं विना न चित्रमिति । सूक्ष्मदेहस्या
त्मत्वं दूषयति मूर्तत्वेपि न संघातयोगात् तरणिवत् ॥२३॥ मूर्तत्वेपि सक्रियत्वेपि अनेन सूक्ष्मदेहेप्यमा
णमुक्तं । सूक्ष्मदेहोपि नात्मा संघातयोगात् संहतत्वस्य परार्थत्वव्याप्यत्वात् तदतिरिक्त आत्मेत्यर्थः । तर
णिः प्रकाशः प्रत्यक्षोपि परार्थः । मनस आत्मत्वं निरस्यति । अणुपरिमाणं तत्कृतिश्रुतेः ॥२४॥ तत
मनः अणुपरिमाणं अल्पं । कृतिश्रुतेः । क्रियाश्रवणात् । आत्मनश्च व्यापकत्वात् । मनसोऽन्यमपत्व ।

संहतत्वात् ३

३५ स्यैवं वृत्तिनिरोधे उपायान्तरमाह। निरोधश्छर्दिविधारणाभ्यां।३४। वृत्तीनामित्यादि। छर्दिः रेचक
विधारणं कुंभकः पूरकस्याप्युपलक्षणं प्राणायामैरित्यर्थः स्वकार्यमाचेष्टः स्वकर्मस्वाश्रमवि
हितकर्मानुष्ठानं।३५। वृत्तिनिरोधोपायान्तरमाह। वैराग्यादभ्यासाच्च।३६। वैराग्यादुक्तंपूर्व
३५ पादभ्यासाच्च। विपर्ययभेदाः पंच।३७। अविद्या मिथ्याज्ञानं। अस्मिताऽभिमानः। रागोनुरागः
श५ द्वेषः क्रोधः। अभिनिवेशस्त्रासः। अशक्तिरष्टाविंशतिधा।३८। तुष्टिर्नवधा।३९। सिद्धिरष्टधा।४०। ष५
चतुर्णां विपर्ययभेदानामवान्तरानाह। अवान्तरभेदाः पूर्ववत्।४१। विपर्ययस्यावान्तरभेदाः पू
र्वाचार्यैर्ये उक्तास्तथा बोध्याः। तथाहि पंचानां विपर्ययभेदानामविद्यास्मितारागद्वेषाभि
निवेशानां तमो मोहो महामोहस्तामिस्रोऽन्धतामिस्र इति क्रमेण नामानि। अव्यक्तमहदहं
कारपंचतन्मात्रेष्वनात्मस्वात्मबुद्धिरविद्यातमः। साचाष्टविधविषयत्वादष्टविधा। देवा
अष्टविधमैश्वर्यमासाद्यामृताभिमानिनोऽणिमादिकमात्मीयं शाश्वतं मन्यन्ते सेयमस्मिता
मोहः। साप्यष्टविधैश्वर्यविषयत्वादष्टविधा। शब्दादिपंचसु दिव्यादिव्यतया दशविधेषु राम

त्वेन तु स्यादत आह। स्वप्नजागराभ्यामिव मायिकामायिकाभ्यां नोभयोः मुक्तिः पुरुषस्य ॥२५॥ मायिक
कर्म अमायिकं ज्ञानं स्वप्नजागराभ्यामिव भिन्नकालाभ्यां ताभ्यां मुक्तिः नोभयोरेककालत्वं ये
न समुच्चयः स्यात्। नित्यकर्मापि चित्तशुद्धावेवोपयुज्यते न तु मुक्ताविति। कर्मणो मायिकत्व
मिथ्यात्वं न किंतु अनात्यंतिकफलत्वमित्याह। इतरस्यानात्यंतिकं ॥२७॥ इतरस्य मायिककर्मणो
सं ५ यिनौतिकं फलमतो मायिकत्वमुक्तं। एतेन ज्ञानस्यामायिकत्वं व्याख्यातं। योगिनः संकल्पमा
त्रेण सिद्धे पदार्थे थिन मिथ्यात्वमित्याह। संकल्पितवत् ॥२८॥ न मिथ्यात्वमिति बुद्धिस्थं। ननु।
लयूहस्य कारणाभावे जायमानस्य कथं न मिथ्यात्वं तत्राह। भावनोपचयाच्छुद्धस्य सर्वं प्रकृ
तिवत् ॥२९॥ इद्धस्य प्राणायामादिभिर्योगिनः भावनायाः ध्यानस्योपचयादभिवृद्धिः स्यात् एवं
सर्वं संपद्यते। न तत्र दृष्टकारणापेक्षा। नास्मदादिवद्धितया संकल्पयोगीति भावः। प्रकृतिव
त् प्रकृतिर्यथाऽनपेक्षैव पूर्वं कारणं महदादिकार्यं करोति तद्वत्। ध्यानमाह। रागोपहतिर्ध्या
ग २ नं ॥३०॥ रागस्य रजोगुणस्य उपहतिर्निश्चलत्वमिति यावत्। तदुपायमाह। धारणासनस्वक
र्मणा तत्सिद्धिः ॥३१॥ धारणां नाभ्यादिदेशे चित्तधारणं। आसनमाह। स्थिरसुखमासनं ॥३२॥

वृत्तिनिरोधात्तत्सिद्धिः ३२ वृत्तयः प्रमाणाद्याः तन्निरोधात् ध्यानसिद्धिः ॥ वृत्तिनिरोधोपायमाह २

ति लब्धं मन्तंते ध्यानाभ्यासेन तत्...देव मे नास्तीति कस्यचिदुपदेशात् शिष्यस्य तुष्टिः। इयमेवांभ उ-
च्यते। उपादानतुष्टिर्यथा। प्राकृत्यपि विवेकख्यातिर्न प्रकृतिमात्राद्भवति मा भूत्सर्वस्य सर्वदा प्रकृ-
तिमात्रस्य सर्वान्प्रत्यविशेषात्। प्रव्रज्याहेतुका तु सा। तस्मात्प्रव्रज्यामुपाददीथाः कृतं ते ध्याना-
भ्यासेनेत्युपदेशात्तुष्टिः सा च सलिलमुच्यते। कालतुष्टिर्यथा। प्रव्रज्यापि सद्यो निर्वाणदा न

भवति। किंतु कालमपेक्षते ति कालान्तो सिद्धिर्भविष्यत्यलमुत्तप्ततया तवेत्युपदेशात्तुष्टिः। ओघ उ-
च्यते। भाग्यतुष्टिर्यथा। कालादपि न सर्वेषां मुक्तिः पितु भाग्यादेव कस्यचित्। अतः मंदालसापत्या-
नां बालेष्वपि मातुरुपदेशमात्राद्विवेकख्यातिर्ला... भेन मुक्तिरभूत्। तस्माद्भाग्यमेव हेतुर्नान्य
इत्युपदेशात्तुष्टिरित्युच्यते बाह्याः पंच। अनात्मनः प्रकृतिमहदहंकारादीनात्मत्वमभिमन्यमानस्यैव
विषयोपरमे सति भवन्ति। ... तथाहि। शब्दादिषु पञ्चस्वपि विषयेषु अर्जनरक्षणक्षयदो... भ
भोगहिंसादोषदर्शनजन्मानः पंचोपरमा भवन्ति। ते च पंच तुष्टयो भवन्ति। स्रक्चंदनवनिता-
पार्जनं बहु दुःखमनुसंदधतो विषयोपरमे तुष्टिरेका। अर्जितमपि धनादिकं राजादिभ्यो विना-
शयतीति तद्रक्षणे महद्दुःखमिति भावयतो विषयोपरमे तुष्टिर्द्वितीया। अत्यायासेनार्जितं रादि

रागश्चासक्तिर्महामोहः स [stain] च दशविधविषयत्वाद्दशविधः शब्दादयो दशाणिमादयोऽष्टौ परस्प
रेणोपहन्यमानाः कोपनीया भवन्तीति तद्विषयो द्वेषस्तामिस्रोऽष्टादशविधविषयत्वादष्टादशवि
धः देवा असुरा अणिमादिकमैश्वर्यमासाद्य शब्दादीन् विषयान् भुंजानाः शब्दादयो भोग्यास्तदुपायश्चा
णिमादयोऽस्माकमसुरैर्जातूपहन्येरन्निति बिभ्यति सोऽयं त्रासोऽभिनिवेशो महातामिस्रः सोऽप्यष्टा
दशविधविषयत्वादष्टादशविध इति संकलनया द्विषष्टिर्विपर्ययभेदाः अशक्तेर्भेदानाह एवमि
तरस्याः ॥४८॥ पूर्वाचार्यान्तराशक्तेर्भेदा ज्ञेयाः ते च बाधिर्यं कुष्ठिता [stain] न्धत्वं जडताजिघ्रता तथा।
मूकता कौण्यपंगुत्वं क्लैब्योदावर्तमुग्धताः इत्येकादशेन्द्रियवधाः तुष्टयो नव सिद्धयोऽष्टौ तद्विपर्यये
णासप्तदश बुद्धेर्वधाः इत्यष्टाविंशतिधा पुंसोऽशक्तिः जडता रसाज्ञानं कौण्यं ग्रहणासामर्थ्यं।
उदावर्तो विसर्गासामर्थ्यं। मुग्धता विषयाज्ञता। तुष्टिभेदानाह। आध्यात्मिकादिभेदान्नवधातु
ष्टिः ॥४९॥ तुष्टयो द्विधा आध्यात्मिका बाह्याश्च तत्र प्रकृतिव्यतिरिक्तमात्मानमधिकृत्यपन्नव।
न्ना आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्यनामानः तत्र प्रकृतितुष्टिर्यथा प्रकृति
व्यतिरिक्ते आत्मनि ज्ञाते विवेकसाक्षात्कारो हि प्रकृतिपरिणामस्तं च प्रकृतिरेव करिष्यती

ब्यसप्रस्तचारिभिः सह न संवादयेत् तस्मात् सुहृदां गुर्वादीनां प्राप्तिरवश्यकीति सा च रम्यकमुच्यते।
दानं पंचमी सिद्धिः दानं च विवेकज्ञानस्य शुद्धिः दैपशोधन इत्यस्माद्दानपदोत्पत्तेः यदाह पा-
तंजलिः विवेकख्यातिरविप्लवा हानोपाय इति अविप्लवः शुद्धिः सा च सवासनसंशयविपर्या-
सपरिहारेण विवेकसाक्षात्कारस्य स्वच्छप्रवाहे अवस्थानं इयं तु न विना दरनैरंतर्यदीर्घकाल
सेवनिताभ्यासपरिपाकाद्भवतीति दानेन कार्येण सोऽपि संगृहीतः सेयं सदामुदितमुच्यते।
इमाश्च पंचाऽमुख्याः सिद्ध्युपाहेतुत्वात्। तिस्रः पुनः फलान्मुख्याः आध्यात्मिकदुःखवि-
विघातः आधिदैविकदुःखविघातश्चेति। इमाश्च क्रमेण प्रमोदमुदितमोदमाना नामानः
एवं पंचविपर्ययभेदाः प्रशक्तेरष्टाविंशतिधा। तुष्टिर्नवधा। सिद्धिरष्टधेति पंचाशत्पदा-
र्थाः विपर्ययाशक्तितुष्टयश्च हेयत्वात्। नैतरादितरहानेन विना ॥५१॥ इतरासां विपर्ययाश-
क्तितुष्टीनां हानेन विना इतरात्तु इतरस्मात् अप्रहानात् सिद्धमानं भवन्तीति शेषः आसां सिद्धि-
परिपंथिनीत्वादिति भावः इतरादिति छांदसं। इतरेतर सर्वत्र सर्वनाम्नो बहुत्वनिमात्रे पुंव।

आधिभौतिकदुःखविघातः ५

तंचतंभुज्यमानेक्षीयतएवेतिक्षयंभावयतोविषयोपरमेतुष्टिस्तृतीयानजातुकामःकामानामु
पभोगेनशाम्यति·हविषाकृष्णवर्त्मेवभूयएवाभिवर्द्धतेइत्युक्तेभोगाभ्यासात्कामावर्द्धन्ते·ते
चविषयाप्राप्ताकामिनंदुःखयन्तीतिभोगदोषंभावयतोविषयोपरमेतुष्टिश्चतुर्थी।ना
नुपहत्यभूतान्युपभोगःसंभवतीतिहिंसादोषदर्शनाद्विषयोपरमेतुष्टिःपंचमी·एताश्चक्र
मेणापारंसुपारं·पारापारंअनुत्तमांभः·उत्तमांभइतिचोच्यते।इतिनवतुष्टयः।सिद्धेर्भेदा
नाह।ऊहादिभिःसिद्धिः।५१।ऊहादिभेदैरष्टधासिद्धिरित्यर्थः।तत्रऊहःशब्दोऽध्ययनं
सुहृत्प्राप्तिर्दानंचेति·प्रथमौतत्क्रमात्यदार्थक्रमोबलवानित्यभिप्रेत्यक्रमान्तरेव्या
ख्यायन्ते·तत्राद्यासिद्धिरध्ययनंनामविधिवद्गुरुमुखादध्यात्मविद्यानामक्षरस्वरूपा
ग्रहणंतारमुच्यते·द्वितीयासिद्धिः शब्दःशब्दइतितज्जनितमर्थज्ञानंसुतारमुच्यते·तृ
तीयाऊहस्तर्कःआगमाविरोधिन्यायेनागमार्थपरीक्षणं।यदिदंमननमाहुःसातारता
रमुच्यते।सुहृत्प्राप्तिश्चतुर्थीन्यायेनपरीक्षितमप्यर्थंनतावत्श्रद्धत्तेयावत्गुरुशि

गाद्धेयः ।५२। उत्तरोत्तरविशिष्टजन्मलाभेपि आवृत्तिर्यतोतः संसारो हेयः । सर्वत्र जरामरणा
दिजं दुःखं ।५३। स्पष्टं । प्रकृतिलयात्कृतकृत्यतां निरस्यति । न कारणलयात्कृतकृत्यता मग्नव
दुत्थानात् ।५४। पूर्णं घातसहस्रं तु तिष्ठंत्यव्यक्तचिंतका इत्युक्तेः कारणलीनस्य मग्नवत्पुन
रुत्थानप्रतीतेः । निर्गुणां पुरुषं प्राप्य का लसंख्यान विद्यत इत्युक्तेस्तु न मुक्तो पुनरावृत्तिः ।
ननु प्रकृतिपुरुषयोर्नित्यत्वाविशेषे कुतः प्रकृतेरेव सृष्टत्वं तत्राह । अकार्यत्वेपि तद्योगः पा
रवश्यात् ।५५। अकार्यत्वेपि नित्यत्वेपि तद्योगः सृष्टत्वयोगः पारवश्यात्परार्थत्वात् । प्रकृ
तेरचेतनायाः अधिष्ठाता चेतनः कश्चिदस्ति स च सर्ववित् सर्वकर्तेति मतं दूषयति । स हि
सर्ववित् सर्वकर्ता ।५६। स हीति प्रकृतिपदार्थ एवेत्यर्थः प्रकृतेः परिणामित्वेन ज्ञानवृत्तिरू
पपरिणामसंभवादिति भावः । ईश्वरकारणत्वप्रतिपादकश्रुत्यादीनामप्ययमेवार्थ इत्या
ह । ईदृशेश्वरसिद्धिः सिद्धा ।५७। सिद्धिर्ज्ञानं सिद्धा प्रमाणजन्या ॥ प्रधानं किमर्थं प्रवर्त्तते त
त्राह ॥ प्रधानसृष्टिः परार्थं स्वतोप्यभोक्तृत्वादुष्ट्रकुंकुमवहनवत् ।५८। परार्थं पुरुषार्थं । अ

भवः सृष्टिभेदमाह। देवादिप्रभेदा ॥४६॥ स्यादिति शेषः अष्टविधो दैवस्तैर्यग्योनः मानुष्यश्च
ब्राह्मः प्राजापत्यः ऐन्द्रः पैत्रो गान्धर्वो याक्षो राक्षसः पैशाच इत्यष्टविधो दैवः पशुमृग
पक्षिसरीसृपस्थावरा इति पंचविधस्तैर्यग्योनः एकविधो मानुष्यः ब्राह्मणत्वाद्यवान्तर।
जातिभेदाविवक्षया संस्थानस्य चतुर्ष्वपि वर्णेष्वविशेषादिति समासतो भौतिकः सर्गः प्र
कृतेः प्रवृत्तिशीलत्वात्सर्वदा सृष्टेः कथं मुक्तिरित्यत आह। आब्रह्मस्तंबपर्यन्तात्कृते सृष्टि
राविवेकात् ॥४७॥ विवेकज्ञानपर्यन्तमेव प्रकृतिः प्रवर्तते स्वभावात्। कुत्र कथं सृष्टिरित्याह
ऊर्ध्वं सत्त्वविशाला ॥४८॥ तमोविशाला मूलतः ॥४९॥ मध्ये रजोविशाला ॥५०॥ भुवः प्रभृति
सत्यान्ता सत्त्वबहुला मूलतः सृष्टिः पश्वादिस्थावरान्ता तमोबहुला मध्ये [illegible] रजोबहुला।
धर्माधर्मानुष्ठानपरत्वाद्दुःखबहुलत्वाच्च एवमस्याः प्रकृतेः सृष्टिवैचित्र्यं कथं तदाह। कर्मवै
चित्र्यात्प्रधानचेष्टा गर्भदासवत् ॥५१॥ गर्भदासो यथा विचित्रं कर्म कुरुते प्रभोरर्थे तद्वत्।
ननु कर्मवैचित्र्यादुत्तरोत्तरभूमिलाभे किमादेयेत्यत आह। आवृत्तिस्तत्राप्युत्तरोत्तरयो

पमाह। द्वयोरेकतरस्य वौदासीन्यमपवर्गः॥६५॥ विविक्तिं न प्रत्यप्रवृत्तिः प्रकृतेरौदासीन्यं। प्रकृत
नमिच्छंगः पुरुषस्य। एकतरस्यात्मनः मुख्यत्वात्तस्य प्रकृतेरौदासीन्यं सर्वमुक्तिः स्यादत आह। अ
न्यसृष्ट्युपरागेऽपि न विरमते प्रबुद्धरज्जुतत्त्वस्यैवोरगः॥६६॥ उपरागः करणं। ज्ञानिनं प्रत्यौ
दासीन्यपि अज्ञानिनः प्र तिप्रवर्तते दृष्टान्तः स्पष्टः। कर्मनिमित्तयोगाच्च॥६७॥ सृष्टौ हि क
र्मापि निमित्तमित्युक्तं। तच्चाज्ञानिनोऽस्ति ज्ञानिनो नास्ति॥ क्षीयन्ते चास्य कर्माणीति श्रुतेः। अ
३९ दृष्टस्याकारणत्वमाह। नैरपेक्ष्येऽपि प्रकृत्युपकारेऽविवेको निमित्तं॥६८॥ अदृष्टनैरपेक्ष्येऽपि
अविवेकः प्रकृतिप्रवृत्तावपेक्षितः। प्रकृतेर्निवृत्तिं दृष्टान्तेनाह। नर्तकीवत्प्रवृत्तस्यापि
निवृत्तिश्चारितार्थ्यात्॥६९॥ नर्तकी सभ्यान्प्रत्यात्मानं प्रदर्श्य निवर्तते तथा प्रधानमपि। नर्त प्र६
कीवत्पुनः कदाचित्प्रवर्तिष्यते नेत्याह। दोषबोधेऽपि नोपसर्पणं प्रधानस्य कुलवधूवत्॥७०॥ विवेकज्ञा
नात्स्वदोषबोधे सति उपसर्पणं नैवेत्यर्थः कुलवधूर्यथा परपुरुषेण दृष्टाहमिति जानाना नोपस
र्पति। बंधमोक्षौ च पुरुषस्याविवेकादेव न तु स्वाभाविकावित्याह। नैकान्ततो बन्धमोक्षौ पुरुष
स्याविवेकादृते॥७१॥ एकान्ततः स्वाभाविकौ। प्रकृतेरेव स्वाभाविकावित्याह। प्रकृतेराञ्जस्यात्ससंगत्वात्पशुवत्
॥७२॥ आंजस्यात्तत्वतः ससंगत्वाद्गुणयोगात् तत्स्यात्। प्रकृतिगतयोरपि बंधमोक्षयोः अविवेकात्पु

त्यैवार्थस्वतःप्रभोक्तृत्वादेवेत्यर्थः। पुष्पकुंकुमवदिति। दृष्टांते न चेतनस्यैव परार्थप्रवृत्ति
माशंक्याह। अचेतनत्वेपि क्षीरवच्चेष्टितं प्रधानस्य॥५८॥ यथा क्षीरं वत्सविवृद्ध्यर्थं प्रवर्त्त
ते। दृष्टांतांतरमाह॥ कर्मवद्दृष्टेर्वा कालादेः॥६०॥ कृषिपत उप्यते इति कर्म कृषीवलेनोप्तमा
न्नं बीजादि वृष्टिमपेक्ष्य कालादुप्तबीजमपेक्ष्य वा दोहिरूपेण परिणमते तथा प्रधान
मपि। उष्टस्पत उन्निमियापि कुंकुमवत् न वर्तते प्रकृतेरचेतनत्वेन तु न स्वार्थानुसंधा
नमित्यत आह। स्वभावाच्चेष्टितमनभिसंधानाद्भृत्यवत्॥६१॥ गर्भदासो हि स्वभावादेव स्वामि
कार्यं करोति न स्वार्थमनुसंधायेति प्रसिद्धं। कर्माकृष्टेर्वानादितः॥६२॥ अनादित्वात्संसार
स्य धर्माधर्मापेक्षितं प्रधानं प्रवर्त्तत इत्यर्थः। शत रूत्वौपि पयच्चमवदितनमित्याशये ना
हा। विविक्तबोधात्सृष्टिनिवृत्तिः प्रधानस्य सूदवत्पाके॥६३॥ यथा सूपकारः पाकं कृत्वा।
निवर्त्तते। सत्यपि विवेकज्ञाने कुतो न मुक्तिरित्याशंक्याह। इतर इतरवत्तद्दोषात्॥६४॥ इतरः के ३२
वलविवेकज्ञानवानपि इतरवत् विवेकज्ञानरहितवत्। तस्य विवेकज्ञानस्य दोषात्संशय
स१ विपर्ययरूपात्। तथा च विवेकज्ञानस्य रूढ्यर्पितत्वाभ्यासे यतनीयमिति भावः। द्वयोरेक

नास्त्य भोगे महान् भेद इति भावः ॥ मध्यविवेकिनः स्वरूपमाह । जीवन्मुक्तः ॥७८॥ जीवन्न
पि मुक्तः । वजीवन्मुक्ते प्रमाणमाह । उपदेश्योपदेष्टृत्वात्तत्सिद्धिः ॥७९॥ जीवन्मुक्तस्य रागाद्य
भावान्नोपदेष्टृत्व संभवः मंदविवेकिनूपदेश्यः तथा च तदुपदेष्टृत्वाज्जीवन्मुक्ति
सिद्धिः । अत्र प्रमाणं दर्शयति । श्रुतिश्च ॥८०॥ समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति । त
स्मै स विद्वानुपसन्नाय सम्यग् इति श्रुतिः विदुष उपदेष्टृत्ववादिन्यस्ति । विपक्षे बाधमा
ह । इतरथान्धपरंपरा ॥८१॥ अज्ञानिना कथमज्ञानी उपदेश्यः । ज्ञानिनः शरीरं कथं तिष्ठती
त्याह । चक्रभ्रमणवद्धृतशरीरः ॥८२॥ यथा दण्डेन भ्रम्यमाणं चक्रं निवृत्तेपि दण्डे भ्राम्य
त्येव एवं विवेकिनं प्रकृतेर्निमित्तावपि पूर्वव्यापारेण जातं शरीरं तिष्ठतीत्यर्थः । ननु
दण्डक्रियास्थानीये वितत्संस्कारा भ्रमयामस्तु रागाद्यभावे उपभोगस्तु कथं स्यादत आह
संस्कारलेशतस्तत्सिद्धिः ॥८३॥ संस्कारो रागादीनां मरणेतिभावः । विदेहमुक्तिमाह ॥ विवेका
न्निःशेषदुःखनिवृत्तौ कृतकृत्योनतरान्नेतरात् ॥८४॥ उपभोगेन प्रारब्धसमाप्तौ प्रान्ते त्रिविध
दुःखस्यात्यन्तनिवृत्तौ कृतकृत्यो मुक्तो भवति । कर्मणो मुक्तिहेतुत्वाभावमुपसंहरति । इतर

रूपसंबंध इति भावः प्रकृतिः किंपर्यंत रूपैरात्मानं बध्नाति तदाह ॥ रूपैः सप्तभिरात्मानं बध्नाति प्र
१२ धानं कोशकारवद्विमोचयत्येकेन रूपेण ॥७३॥ सप्तभिर्धर्माधर्मैः रागैश्वर्याज्ञानाधर्मवैराग्यानै
श्वर्यैरेकेन ज्ञानेन ॥ ननु विवेकख्यात्यर्थं निरंतरं ध्यानानुष्ठाने मुक्तिहेतुभूतकर्मत्यागात् मु
क्तिर्न स्यादित्यत आह ॥ निमित्तत्वमविवेकस्य न दृष्टहानिः ॥७४॥ संसारस्य कारणमविवेक
१५ स्तन्निवृत्तये विवेकख्याता चेयमनीयं तेन दृष्टफलं मुक्तिहानिर्भविष्यति कर्मणां तु चित्तशुद्धि
द्वारा मुक्तिः फलमिति न दृष्टमित्युच्यते ॥ विवेकः कथं स्यात्तत्राह ॥ तत्त्वाभ्यासान्नेति नेतीति त्यागा
द्विवेकसिद्धिः ॥७५॥ नेति नेतीति तत्त्वाभ्यासाद्देहेंद्रियादिवैलक्षण्येनात्मनः पुनः पुनश्चिंतनात्त्या
गात्संन्यासात् च विवेकसिद्धिः विवेकसाक्षात्कारः तथा च श्रुतिः ॥ अथात आदेशो नेति नेती
ति ॥ त्यागेनैके अमृतत्वमानशुरिति च ॥ अधिकारिप्रभेदान्न नियमः ॥७६॥ ननु अभ्यासेन चेद्वि
वेकसिद्धिद्वारा मोक्षस्तर्हि सर्वेषां शिष्याणां स्यादेकदाभ्यासविशेषादित्यत आह ॥ बाधितानुवृत्त्या
मध्यविवेकतोऽप्युपभोगः ॥७७॥ मध्यमं तं नाम विदेहमुक्तिप्रतिबंधकप्रारब्धशेषवंतं तद्वतो
विवेकात् उपभोगोपोत्पन्नयः रागद्वेषाभावात् बाधितस्य दुःखविषादस्य स्वप्रयोजकस्य
कामानुत्पादकस्यापि अनुवृत्त्या प्रारब्धकर्मफलत्वेन चयवात यातयाच विवेकवद्विवेकि

८१ दशः कार्यः अपिकारिपादलमाप्नुयामिति। तत्र दृष्टान्तः। पिता पुत्रश्चेति। कश्चिद्दरिद्रो ब्राह्मणः स्वास्य
नो भार्यां गुर्विणीं पितृगृहे स्थापयित्वा देशान्तरं गतो बहुना कालेन समागतः स्वपुत्रं दृष्ट्वापि
स्वपुत्रोयमिति न ज्ञातवान्। पुत्रोपि पितरं दृष्ट्वा मत्पितायमिति। ततो मात्रा भर्ता पुत्रश्चोप
दिष्टः अयं ते पुत्रोयं ते पितेति क्रमेण। ततस्तौ सुखिनौ बभूवतामित्याख्यायिका। सांसारिकसुखं
42 दुःखमिश्रितत्वाद्धेयमित्याह। श्येनवत्सुखदुःखी त्यागवियोगाभ्यां। ५। सर्वोपि जनः सुखवा
न् दुःखवांश्च दुःखमिश्रितसुखवानित्यर्थः त्यागवियोगाभ्यां श्येनवत् केनचिन्मजापांगत्वा।
संप्राप्तः श्येनशावकः पोषितश्चान्न मानाभ्यां काले यौवनमाप्नुवान्। अथैनं वं श्येन दुःखि
कृतोहं करोमीति चिंतयता तेन श्येनो वने त्यक्तः स यथा बंधनत्यागात्सुखी यो मम पुत्रवियोगा
द्दुःखी तथा सर्वोपि बिलप्यपि कस्तु खी दुःखवानेवेत्यर्थः। ममत्व दिरनर्थावह इत्याह॥ अहि सो ६
निर्ल्वयिनीवत्।६। अहिनिर्ल्वयिनी सर्पनिर्मोकः त्वक् तस्यामिव। यथा सर्पः निर्मोकं विवर द्वारे त्यक्त्वा
पिहते हा तत्र ममत्वेन त्यजति। किंतु तं धूलीपंकाक्तं दृष्ट्वा शोचति। अथ च तदनुसाराद्दैवकेनचि
दाहितुंडिकेन गृहीतो बहुनर्थभाजनं भवति। तथा विषयेषु स्निह्यन् जंतुरित्यर्थः। अथ कांपि सर्व

सात्कर्मिणः इतरादितितु संज्ञापूर्वको विधिरनित्य इति वाष्ठ्यांदसत्वंचात्वो कृत्यसंगमनीयं । वीप्सा आ
पसमाप्तेर्या ॥ इति वेदान्तिमहादेवकृतवृत्तिसारे तृतीयोध्यायः ॥३॥ २८४ ॥ वैराग्यानन्तरं शिष्यप्र
बोधायाख्यायिकापूर्वापश्चतुर्थोध्यायः । राजपुत्रवत्तत्त्वोपदेशात् ।१। राजसूनोः स्मृतिप्राप्तौ व्याध
भावो निवर्तते । यथैव मालिनो नष्टेत्युक्तरीत्या गुरूणा तत्त्वोपदेशादेवरूपं कृतकृत्यता भवति । उ
क्तंच गारुडे । ब्रह्मविष्णुद्विजः कश्चिच्छूद्रोहमिति मन्यते ॥ ब्रह्मनाशात्पुनः स्त्री यं ब्राह्मणं स्वं मन्य
ते यथा । मायाविष्टस्तथा जीवो देहोहमिति मन्यते । मायानाशात्पुनः स्वीयं रूपं ब्रह्मास्मि मन्य
त इति । प्रसंगेनाप्यात्मज्ञानान्मुक्तिरित्याह । पिशाचवदन्यार्थोपदेशेपि ।२। केनचिद्गुरुणा
विजने शिष्य उपदिश्यमाने तर्हि तेन केनचित्पिशाचैरुपदेशः श्रुतः मुक्तश्च सोभूदिति । याख्या नत
यते एव मन्योप्यन्यार्थोपदेशान्मुच्यते । अत्रैव कंचन विशेषमाह । आवृत्तिरसकृदुपदेशा
त् ।३। तीव्रवैराग्ये सकृदुपदेशश्रवणादेव मोक्षो लभ्यते । मंदे त्वसकृदुपदेशादावृत्तिर्वा
आवृत्तिरादरणीया न चोपदेशार्थं गुरुरावश्यक इत्याह । पितापुत्रवदुभयोर्दृष्टत्वात् ।४।
उभयोर्गुरुशिष्ययोः दृष्टत्वात् दृष्टार्थत्वात् नात्र ज्ञाने गुरुनियमः किंत्वात्मज्ञानं नामैवोप

सौ०ठ० नारमेवकार्यं न तु परविजयाद्यभिनिवेशत्वं। किं च गुरुनिदेशमात्रादेवादरणीयं न तु कादाचि
४२ त्कं रागद्वेषादिवशात्। सर्वेषः। अप्रतरन्तोऽन्तं मार्के सत्ये। इदं ज्ञेयमिदं ज्ञेयमिति यस्तृषितश्चरेत्। स तु
कल्पसहस्रेषु नैव ज्ञानमवाप्नुयादिति।। एकाग्रता हरणीयेत्याह।।३५।। कारवन्तो केचित्तस्य स
माधिहानिः।।३६।। एकाकारो हि भृगतम नारदज्ञानं स सेन्यं स्वसमीपमागतं रागद्वेषं तं न जानाति।
तद्वदेव चित्तस्य न समाधिहानिरन्यस्य तु सावश्यं भवतीति चित्ते काग्रतातत्वज्ञानोपादे
42 यमा।। यत्नानियमलंघनादानर्थक्यं लोकवत्।।४५।। यत्नानामंगीकृतानां नियमानां।
शौचादीनां लंघनादननुष्ठानादानर्थक्यं नैष्फल्यं तत्वज्ञानसाध्यप्रवृत्तिरोधः। शौचाद्य म ७
नुष्ठानं तत्वज्ञानसाधनेन तत्वज्ञाने जननीयसहकारीति भावः लोकवत् लोके
यथा कृतानां नियमानां समयानां लंघने राज्यादिसुखकारणमपि निःफलं भवति समय
लंघने प्रजोद्वेगेन राज्यमपि सुखदं न भवति तद्वत्। तत्वज्ञानविस्मरणाद्दुःखं भवतीत्याह
तद्विस्मरणे चेभेकीवत्।।२६।। तदिति बुद्धिस्थत्वात्तत्वज्ञानं परामृश्यते। यथा कश्चिद्राजामृ
गयां गतः सुंदरीं कन्यामद्राक्षीत् दृष्ट्वा च तस्यां साभिलाषो भूत्वा पप्रच्छ कासि त्वमिति। सा च रा
जदुहिताहमित्याह। राजा मां भजस्वेत्याह। तया च जलं मम दर्शयितव्यमिति समयपूर्वकं राजा

राम
४२

ध्यानकार्ये प्रमादकृते च तस्मिन्नवश्यमाविःकृतिः कार्ये त्विह शिंजनतान्वुद्धा ।७। एवमाख्यायते
जहार फलपुष्पादि प्रविश्य भ्रातुराश्रमं मुनिः कश्चित्ततो भ्रात्रा स्तेयीत्युक्त उवाच तं प्रायश्चि
त्तं वदायाह प्रायश्चित्तं कर छिंद्धि ।। निवेदराज्ञे तेनाशु स्वकरौ छेदिताविति ।। भ्रमताध्यानानुचिं
तनेनं ध्याप भरतवत् ।८। भरतः किल हरिणशावकं पुपोष तं विहायान्यमना वभूव सचम
रणसमयेपि तन्मना एव ममार तेन मुक्तिं नाप प्रत्युत जन्म लब्धवानिति पुराणे ।। स्वच्छं
कृमिर्भेत्तरं तत्कृपादिसाह । कृमिभोगे विरोधो रागादिभिः कुमारीशंखवत् । एपप्याकुमारीशंख दि
वलयानां परस्परसंघर्षात् रणत्कारः तथा वहूनां मेलने रागादिभिः परस्परं कलहोऽवश्यं भ ।
वेदिति वहुमेलनं न कुर्यात् ।। द्वाभ्यामपि तथैव ।१०। संकल्पनादिदोषस्य तत्राधि संभवादिति
भावः निराशः सुखी पिंगलावत् ।।११।। आशा हि परमं दुःखं निराशा परमं सुखं इति संत्यज्य का
न्ताशा सुखं सुष्वापपिंगलेति । अनारंभेपि परगेहे सुखी सर्पवत् ।।१२।। गृहारंभो मनुष्या
णां न सुखाय कृपा च न सर्पः परकृतं वेश्म प्रविश्य सुखेन वसत इति । वहुभ्यो गुरुभ्यो सनेपि
सारादानं षट्पदवत् ।१३। सर्वतः सारमादद्यात् द्रव्येभ्य इव कांचनमिति न्यायेन शास्त्रेभ्योपि

परं परयोग्यध्यस्तस्योपदिष्टस्वरूपस्य स्वरूपस्योपासनात् आत्मतत्वदर्शनमिति शेषः। ध्यानेद
र्शनेनापेक्ष्यते। पितृज्ञानतत्त्व गुरुपरंपरैस्तत्वं मम वेति भावः। ननु मुक्तिजनकतत्वज्ञाने
नालं ब्रह्मलोकलाभे नापि कृतकृत्यतानत्राह। इतरलाभेप्यावृत्तिः पंचाग्नियोगतो जन्म
श्रुतेः॥२२॥ पंचाग्नियोगतः पंचाग्न्युपासनात् इतरलाभे पितृलोकलाभेपि आवृत्तिः कु
तः जन्मश्रुतेः इमं मानवमावर्त्तं नावर्त्तन्त इति श्रुतौ इममिति विशेषणान्मानवान्तरे जन्म।
43 प्रतीतेः। तत्र तत्वज्ञानं विरक्तस्यैवेत्याह। विरक्तस्य हेयहानमुपादेयोपादानं हंसक्षीरवत्
॥२३॥ हेयः संसारः उपादेयो मोक्षः कुत इत्यत आह। लब्धातिशययोगाद्वा तद्वत्॥२४॥ तद्वत्
हंसवत् हंसस्यैव क्षीरनीरविवेचनशक्तिवत् विरक्तस्यैव हेयोपादेयविवेचनातिशय
युक्तिलाभादिति भावः। वाशब्द एवार्थे विरक्तस्यैवेत्यादिः॥ न कामचारित्वं रागोपहते
शुकवत्॥२५॥ रागोपहते कामचारित्वमपि न पुनर्मुक्तिरिति शेषः। वीतरागस्तु मुक्तिः
शुक वेद्व बन्धः कथमित्यत आह। गुणयोगाद्बद्धः शुकवत्॥२६॥ गुणशब्दः श्लिष्टः प
क्षे मधुरभाषणादिगुणयोगात् शुकः पक्षी बध्यते। एवं सत्वरजस्तमआत्मकगुणयो
गात् आत्मा बध्यत इति भावः। वैराग्यं च न योगात् अपि तु दोषदर्शनादित्याह सूत्राभ्यां।

पतित्वेनांगीकृतः। एवं गते काले क्रीडमाना सिता सती कदाचिद्राजानमाह। कुत्र जलमिति
राजा तु सम्यग्विस्मरणाज्जलं प्रदर्शयामास। सा च जलस्पर्शाद्भेकी भूत्वा जले प्रविष्टा।
राजा तु तद्विरहादुःखमवापेत्याख्यायते॥ नोपदेशश्रवणमात्रेण कृतकृत्यता पितुरु
रुनिकटे स्थित्वा मननादि कुर्वतस्त्वेवेत्याह॥ नोपदेशेपि कृतकृत्यता परामर्शादृते विरो
चनवत् ॥१८॥ परामर्शो मननादि विरोचनो हि उपदेशं श्रुत्वैव गतः नतु मननादि कृतवान् ग
अतो नामुच्यते। दृष्टान्तयोरिन्द्रस्य ॥ तयोरिन्द्रविरोचनयोर्मध्ये इन्द्रस्य दृष्टः कृतकृत्य
भावः। इति शेषः। कथमिन्द्रस्य कृतकृत्यभाव इत्यत्राह॥ प्रणतिब्रह्मचर्योपसर्पणानि
कृत्वा सिद्धिर्बहुकालात्तद्वत् ॥१९॥ उपसर्पणं समीपे वसनं तद्वत् अन्यस्यापीति शेषः।
न कालनियमो वामदेववत् ॥२०॥ साधनेन कालनियमः एतज्जन्मनि जन्मान्तरे वेति।
गर्भस्थ एव हि वामदेवो जन्मान्तरानुष्ठितसाधनात् ज्ञानमवापेति श्रूयते ननु दृष्टव्या
नं स्यान्नचात्माके नापि दृष्टः दृष्टश्चेत् किं ध्यानेन तत्राह। अध्यस्तरूपोपासनात्पारंप
र्येण यज्ञोपासकानामिव ॥२१॥ परज्ञानुष्ठाधि नां ब्रह्मधर्मलाभवत् पारंपर्येण गुरु

तत्र कृतेपि मंगले ग्रन्थस्यासमाप्तेः कृते समाप्तेश्चेति तद्दूषयति मंगलाचरणं शिष्टाचार
फलदर्शनाच्छ्रुतितश्चेति ।२। श्रुतितः इति शिष्टाचारानुमित श्रुतित इत्यर्थः। असमा — श्रनु
प्तिरंगवैकल्यात् समाप्तिर्जन्मान्तरीय मंगलात् इति समाधान संभवात् । पराक्रान्तं चा — प्ति
न्न सूरिभिः ईश्वरेणाधिष्ठितकारणे कार्योत्पत्तिः कुलालाधिष्ठित मृदादेर्घटोत्पत्तिद
न र्शनादिति दूषयति । ईश्वराधिष्ठिते फलसंपत्तिः कर्मणात् ।
सिद्धेः ।२ ईश्वरः किं कर्मापेक्ष्य सृजति अनपेक्ष्य वा । आद्ये कर्मैव कारणमस्तु नेश्व
44 रः अन्येस्यात्कृतविघातः। किंचेश्वरस्य स्वार्था परार्था वा प्रवृत्तिः नाद्यः तस्याप्तकामत्वस्वी
कारात् । नान्त्यः कारुणिकस्य दुःखस्य सृष्टिप्रवृत्त्यनुपपत्तेः किंच यः कारणमधितिष्ठति स
स्वोपकारायैवेवमीश्वरस्यापि स्यादित्याह । स्वोपकारादधिष्ठानं लोकवत् ।३ स्वोपकारादि
ति फलेहेतौ पञ्चमी । अस्तु ईश्वरेपि स्वोपकारस्तत्राह । लौकिकेश्वरवदितरथा ।४ इतरथा
स्वोपकारस्वीकारे लौकिकेश्वरवत् अनाप्तकामत्वापत्तिर्दोषः । लौकिकेश्वरवेल्लक्षणपारि — रिति ३
भाषिकं वेश्वरः स्यादित्याह । पारिभाषिको वा ।५ वा शब्दार्थे कथं पारिभाषिकस्तत्राह । न
रागाद्दृते जगत्सिद्धिः प्रतिनियत कारणत्वात् ।६ नरागाद्दृते जगन्निर्मातृत्वादिसिद्धिः — राग

नमोऽग्रागमान्निर्मुक्तिवत् ।२७। दोषदर्शनादुभयोः ।२८। सौभरिप्रभृतीनामपि मुनीनां भो
गाद्रागशान्तिर्नाभूत् । अस्माद्दोषालुकाबान्ताः उभयोः । आत्मनो विषयस्य च संगान्तरकपात
गर्भवासादयस्त्वात्मनो दोषाः परिणाति निरसत्वादप्रस्तु विषयस्य । न मलिनचेतस्युपदे
शबीजप्ररोहोऽजवत् ।२९। उपदेशरूपस्य बीजस्य कैरराख्यप्ररोहः फलोन्मुखत्वं अजव
त् । अजननामिन्नरूपे भार्याशोकार्ते वसिष्ठोपदेशो न कार्यदायकमासीत् । अतिमलिनचेत
सि ज्ञानाभासोऽपि नेत्याह । नाभासमात्रमपि मलिनदर्पणवत् ।३०। प्रकृतिजन्यस्य भूत ।
भौतिककर्तृत्वादेरिव तज्ज्ञानस्य मोहस्यापि संसारत्वस्या नेत्याह । न तज्जान्यस्यापि तद्रूप
तापंकजवत् ।३१। यथा पंकाज्जातस्यापि न पंकरूपता तथा प्रकृतिजन्यस्यापि न संसाररूप ।
त्वे दुःखस्पर्शेन विशेषात् । ननु दुःखास्पर्शो शिमादि सिद्धिलाभे स्तोत्यत्राह । न भूतियोगेपि
कृतकृत्यतोपास्यसिद्धिवदुपास्य सिद्धिवत् ।३२। आवश्यिसत्वादिति भावः । उपास्य नरत्ना
दिनाया सिद्धिर्विशिष्टाधिकारलाभादिस्तस्यामिव । स नि हि पि स्मृत्वान्न कृतकृत्यतावदेति
वीप्साध्यायसमाप्तिं द्योतयति ॥ इति महादेवकृतसांख्यवृत्तिसारे चतुर्थोऽध्यायः ।३२। प
रवहजयाम्यं पंचमाध्यायमारभते । तत्र ग्रंथारंभे मंगलं न कार्यं निःप्रयोजनत्वात्

गादित्यर्थः । ननु कर्तृत्वाविद्ययोरनादित्वमित्याह । न बीजांकुरवत्सादिसंसारश्रुतेः
॥२५॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यादिश्रुत्या प्रलये संसारस्याभा
वावगमात् संसारस्य सादित्वं । अविद्याया ब्रह्मभिन्नत्वे दूषणमाह ॥ विद्यातोन्यत्वे
ब्रह्मबाधप्रसंगः ॥२६॥ विद्यातो ज्ञानस्वरूपात् ब्रह्मणोऽविद्याया अन्यत्वे ब्रह्मबाध
प्रसंगः । विविधपरिच्छेदशून्यत्वस्य ब्रह्मलक्षणत्वांगीकारात् अविद्यायां ब्रह्मभि
न्नत्वे ब्रह्मणोऽप्यविद्याभिन्नत्वं च भेदप्रतियोगित्वानुयोगित्वरूपवस्तुपरिच्छेदा
पत्तिरिति भावः । किंच विद्यायामविद्यायाः अबाधो बाधो वा । आद्ये आह । अबाधे
नैष्फल्यं ॥२७॥ विद्याया नैष्फल्यापत्तिरित्यर्थः । अन्त्ये आह ॥ विद्याबाध्यत्वे जगतो
ऽप्येवं ॥२८॥ अविद्याया इव जगतोपि बाधः स्यात् । तथा च जगन्न प्रतीयेतेति भावः ।
तद्रूपत्वे सादित्वं ॥२९॥ पुनस्तद्रूपत्वे जगदभिन्नत्वं जायते इत्युपजनने अविद्याया अ
प्यभिन्नत्वात् उत्पत्तिर्वाच्या तथा तथा चाविद्यायाः सादित्वं स्यात् एवं चानिर्मोक्षापत्ति
रिति भावः । इदानीं धर्मस्य स्वकारणतामाह ॥ न धर्मापलापः प्रकृतिकार्यवैचित्र्या

निमित्तरागयोः कार्यकारणभावादित्यर्थः रागांगीकारे दूषणमाह । तद्योगेपि न नि
त्यमुक्तिः ॥७॥ अपि त्वर्थे स्यादिति शेषः ॥ प्रधानशक्तियोगाच्चेत्संगापत्तिः ॥८॥ प्रधान
निष्ठायाः कर्तृशक्तेस्तद्योगाच्चेत्कर्तृत्वं तर्हि प्रधानेन सार्वं संगः स्यात् । तत्रासंगो ह्य
यं पुरुष इति श्रुतिविरोधः प्रधानसत्तामात्रेण कर्तृत्वे त्वाह ॥ सत्तामात्राच्चेत्सर्वैश्वर्यं
॥९॥ प्रधानसत्तायाः सर्वात्मनः प्रत्यविशेषात्सर्वेषामात्मनामैश्वर्यं स्यात् ॥
प्रमाणाभावान्न तत्सिद्धिः ॥१०॥ तत्सिद्धिरीश्वरसिद्धिः प्रत्यक्षप्रमाणाभावस्य प्रसि
द्धत्वादनुमानं निराकरोति । संबंधाभावान्नानुमानं ॥११॥ संबंधाभावाद्व्याप्त्य
भावात् । श्रुतिर्जगतोनीश्वरकार्यत्वस्य बोधिका सिद्धप्रत्युत प्रधानकार्यत्वस्यैव बो
धिका अजामेकामित्यादिरस्तीत्याह ॥ श्रुतिरपि प्रधानकार्यस्य ॥१२॥ बोधिकेति
शेषः । अविद्याशक्तियोगात्कर्तृत्वमिति केचित्तद्दूषयति ॥ नाविद्याशक्तियो
गो निःसंगस्य ॥१३॥ स्पष्टं किंच तद्योगे तत्सिद्धावन्योन्याश्रयत्वं ॥१४॥ अविद्या
योगसिद्धौ सत्यां तद्योगे कर्तृत्वयोगः अन्योन्याश्रयत्वं कर्तृत्वसिद्धौ अविद्यायो

पवयोगात्सुखसंवित्तिः॥२७॥ पंचेंद्रियाण्यवयवा यस्य मनसस्तस्य योगात्संनिकर्षात्सुखसं।
वित्तिः सुखज्ञानं तथाच मानसप्रत्यक्षविषयः सुखमिति भावः॥ अथ व्याप्तिः किं सकृत्सहचार
दर्शनाद्गृह्यते उत भूयः॥ आद्ये वह्निरासभयोरपि व्याप्तिर्गृह्येत तथाच रासभादपि वन्ह्यनु
मानापत्तिः॥ नान्त्यः शतशः सहचरितयोरपि पार्थिवत्वलोहलेख्यत्वयोर्हीरके व्यभिचारा।
त् तस्मान्नानुमानं नाम प्रमाणं संभवतीति केचित्तन्दूषयति॥ न सकृद्ग्रहणात्संबंधसिद्धिः
46 ॥२८॥ व्यभिचारादर्शनसहकृतं सहचारदर्शनं व्याप्तिग्राहकं तच्च सकृद्भूयो वेति नादर इति भा
वः॥ संबंधसिद्धिर्व्याप्तिग्रहणं॥ व्याप्तिस्वरूपमाह॥ नियतधर्मसाहित्यमुभयोरेकतरस्य वा।
व्याप्तिः॥२९॥ धर्मः आधेयो नियतं आधेयसाहित्यं व्याप्तिरिति संबंधः॥ तत्र समव्याप्तिके स्थले
प्रमेयत्वाभिधेयत्वयोरुभयोः विषमव्याप्तिके एकतरस्य धूमादेरिति व्याप्तिः पदार्थान्तरमि। कृ
ति मतं दूषयति। न तत्त्वान्तरं वस्तुकल्पनाप्रसक्तेः॥३०॥ व्याप्तेस्तत्त्वान्तरत्वे यत्र व्याप्तिः
तस्याप्यभिव्याप्त्यावश्यकत्वे तस्याप्येवं कुतोऽनव्याप्तिरिति भावः॥ निजशक्त्युद्भवमित्या
चार्याः॥३१॥ निजा स्वरूपा या शक्तिः सा तदुद्भवं नियतं वह्निसाहित्यं धूमस्येत्याचार्याः बहु
वचनेन स्वाभिमतत्वं ज्ञापयति॥ आधेयशक्तियोग इति पंचशिखः॥३२॥ आधेयश॥

त्॥२०॥ कार्यवैचित्र्यं प्रकृतिमात्रेण न संभवति तस्य एकस्वभावत्वात्। अपि तु धर्मवैचित्र्येण।
धर्मशब्देन चात्रादृष्टमुच्यते न च धर्मे मानाभाव इत्याह। नेति यमः प्रमाणांतरादकाश
त्॥२२॥ नादृष्टमेव कारणमिति नियमः। अपि तु प्रमाणांतरे सत्कारणत्वग्राहकैरन्येषाम
पि कारणत्वावधारणादन्यान्यपि। उभयत्राप्येवं।२३। इहलोके परलोके च एवं अदृष्टजमं सुखं दुः
खमिश्रितं सुखमिति यावत्। अर्थात्सिद्धिश्चेत्समानमुभयोः॥२४॥ अपि तल्लो
कान्तरात् विषयात् दिव्यांगनादिरूपात् सिद्धिः उत्पत्तिः सुखस्य परलोक इति शेषः। त
था च न दुःखमिश्रितत्वं सुखस्येति चेत्। उभयोः इहलोकपरलोकयोः समानमेतत्। इ
हलोकेपि हि सुखकारणान्यमलाः संत्येव विषयाः किंतु सुखं प्रति धर्मः कारणं। स च हि
संदिग्धमिश्रितत्वान्न सुखं दुःखामिश्रितं जनयितुमीष्टे। अपि तु दुःखमिश्रितमेवेति भावः।
आत्मधर्मत्वं धर्मादीनां दूषयति। न मनः कारणं धर्मत्वं धर्मादीनां॥२५॥ प्रसंगो ह्यत्रैप
स्य इति स्मृतेरिति भावः। गुणाः किं गुणवति वर्त्तंते गुणरहिते वा॥ आद्ये आत्मा आश्रयः
अन्त्ये गुणादिरूपविषयगुणप्रसंगः तस्माद्बाधित एव गुणः एवं कर्मादयोपीति केचिद्वादिन
स्तद्दूषयति। गुणादीनां चानन्तरबाधः॥२६॥ एकत्वादिति शेषः। सुखे प्रमाणमाह। पंचाव के ४

सां०वृ०
४७

र्थ इत्यत्र व्यवहारेण यथा गामानयेत्यादौ प्रसिद्धपदसामानाधिकरण्येन यथा सहकारतरौ म-
धुरं पिको रौतीत्यादौ । कार्यान्विते शक्तिरिति मतं दूषयति ॥ न कार्ये नियम उभयथा दर्श-
नात् ॥३९॥ कार्ये कार्यान्विते नियमः शक्तेः नियमः तत्रैव शक्तिरिति यावत् । कार्य इव सि-
द्धेऽपि प्रयोगदर्शनात् । ननु वेदे कार्यान्विते शक्तिरस्तु तत्राह ॥ लोके व्युत्पन्नस्य वेदार्थप्रती-
तिः ॥४०॥ य एव लौकिकास्त एव वैदिका इति न्यायादिति भावः ॥ अपौरुषेयवेदप्रामाण्यमाह ॥ न
त्रिभिरपौरुषेयत्वाद्वेदस्य तदर्थस्याप्यतीन्द्रियत्वात् ॥४१॥ न वेदस्य प्रामाण्यं अपौरुषेयत्वा-
त् । त्रिभिर्हेतुभिः इन्द्रियस्य निराकरणेन अन्यस्यासंभवेन भ्रान्तेः पुरुषधर्मत्वेना-
प्रामाण्यनिश्चयेनेति । नन्वस्तु कश्चिद्दिविषि जीवः कर्तेत्यत्राह तदर्थस्य वेदार्थस्य स्वर्गाप-
वर्गाः साधनस्य च नभावादिरूपस्येन्द्रियागोचरत्वात् । ननु धर्मो वेदार्थः स च यागादि भि-
न्नस्तत्रादिरूपेण वातीन्द्रियस्तत्राह ॥ न यज्ञादेः स्वरूपतो धर्मत्वं वैशिष्ट्यात् ॥४२॥ न या-
गादिमात्रः धर्मः ... यागादेरपि धर्मतापत्तेः । किंतु स्वर्गसाधनत्वावच्छिन्नः स चा-
तीन्द्रिय एव । कुतः वैशिष्ट्यात् । अधिकारिदेशकालादिवैशिष्ट्यं हि स्वर्गसाधनत्वापा-
दकं एवोपायोऽपि । ननु यागादिस्वरूपेणैव व्युत्पत्त्या शक्तिग्रहः स्यादव्यवच्छिद्यते । मुख्यार्थो यातीन्द्रिया
अत्यन्तेऽप्युपयोगमाह ॥ निजशक्तिर्व्युत्पत्त्या व्यवच्छिद्यते ॥४३॥ बोधकतायां शब्दस्य सहजा शक्तिः । र

रम.
४७

तत्प्रयोगे संबध्येत तिसाक्षि त्वमिति शेषः ॥ तथा च साहित्यमाध्येयपरान्तु मन्ये नमितिपंचशि
खइत्येकवचनेन परमतमेतदिति सूच्यते । प्रसंगात् शक्तेः शक्तपदार्थरूपतां निरस्यति ।
न स्वरूपशक्तिनियमः पुनर्वादप्रसक्तेः ॥ ३३ ॥ स्वरूपं चार्थो शक्तिरेवेति स्वरूपशक्तिः तया
नियमो नव्याप्तिर्न । किंतु व्यतिरिक्तपाशक्त्या शक्तेरनतिरिक्तत्वे दूषणमाह ॥ पुनर्वादप्र
सक्तेः सन्नो मंत्र इत्यादौ पुनरुक्तत्वापत्तेरित्यर्थः ॥ विशेषे नर्थक्यप्रसक्तेः ॥ ३४ ॥ देवदत्तदे ॥ ५
वदत्त इति वत्कुर्वन्तो मित्र इति विशेषणमनर्थकं स्यात् ॥ पर्यायवादिष्वनुपपत्तेश्च ॥ ३५ ॥ प
र्यायवादि स्वरूपस्यान्यप्रयोगात्पूर्वमपि सत्वेन मंत्रप्रयोगादृते विविधापनादनादि स्यात् ।
तस्माद्घटपशक्तिरेवास्तु किं सहजमाहोस्विदाहेति चेत्तत्राह ॥ अन्वये परा शक्तिः सिद्धो निजशक्तियो
यः समानन्यायात् ॥ ३६ ॥ यथान्वयव्यतिरेकाभ्यां शक्तेराचयत्नवादिषु वाच्ये परा शक्तिः ।
सिद्धिस्तथैवान्वयव्यतिरेकाभ्यां तत्तदनुगुणसाहचर्याचतत्तत्कर्मभेदशक्तिः सिद्धेः शा
ब्दधीयोस्तादात्म्यं निषिध्यपति । वाच्यवाचकभावः संबंधः शब्दार्थयोः ॥ ३७ ॥ तादात्म्ये
हि घटादिशब्द्यत्र ग्राह्यः स्यात् शब्दो वाच्यो द्विधः स्यात् । अग्निशब्दोच्चारणे मुखदाहादिप्र
संगश्च । शक्तिग्रहोपायमाह ॥ त्रिभिः संबंधसिद्धिः ॥ ३८ ॥ आप्तोपदेशेन प्रयोगं च दृष्टेति ।

सा०वृ०

५८ यां ५०॥ अदृष्टेपि कर्त्तरि अङ्कुरादौ तु न कृतमिति बुद्धिः। किं तु यत्नजमिति। पौरुषेयं सर्वत्र नैवं॥ निज

शक्त्यभिव्यक्तेः स्वतः प्रामाण्यं॥५१॥ निजशक्त्यैव ज्ञानजनकनिजशक्तेर्वाभिव्यक्तेः प्रमाण

स्येति शेषः। स्वतः प्रामाण्यं प्रमात्वावच्छिन्नजनकत्वं न तु गुणाधीनं चैवेदप्रामाण्यं। प्राप्त न ३

वक्तृकत्वं वेदस्यापि दोषेतनाप्रवर्त्तकत्वं पुनरप्रामाण्यप्रयोजकमित्यधिकमाकरे। इदं

रजतमित्यादिभ्रमेषु बौद्धमतं दूषयति। नासतः ख्यानं नृशृङ्गवत्॥५२॥ असदेव शुक्ति

48 रजततादात्म्यं भातीति यत्तन्न। असतोर्थक्रियाविरहितत्वेन ज्ञानजनकत्वानुपपत्तेः

नृशृङ्गस्येव। प्राभाकरमतं दूषयति॥ न सतो बाधदर्शनात्॥५३॥ इदमिति रजतमि

ति च द्वे ज्ञाने एकं ग्रहणमितरत्स्मरणं भेदाग्रहात्प्रवृत्तिर्न भेदग्रहादिति प्राभाकराः

तन्न नेदं रजतमिति बाधदर्शनात्॥ अधिकमन्यत्र। वेदान्तिमतं निराकरोति॥ नानि

र्वचनीयस्य तदभावात्॥५४॥ तदभावात् न सत् नासदित्यनिर्वचनोपपन्नेन निर्वच

नेनानिर्वचनीयाभावात्। नैयायिकमतं निराकरोति। नान्यथाख्यातिः स्ववचोव्याघाता

त्॥५५॥ शुक्तिरेव रजतात्मनाऽवभासत इति आरोपितरजतमेव तत्रावभासत इति च व्या तम

५८

व्यवस्थाप्यते यस्य हि सादृश्यं तस्य तत्र मुख्यबोधकत्वाय स्यात् शक्यद्वारा तत्र गौणत्वेन बोधक
त्वेति । उपलक्षितं चैतत् । मंत्रस्य मुख्यगौणार्थविनियोगानवगमे इत्यादि निर्णये । शक्तिसि
द्धिस्तु मूर्खव्यवहारादपि नान्यथेत्याह ॥ योग्यायोग्येषु प्रतीतिजनकत्वात्तत्सिद्धिः ॥४४॥
योग्यायोग्यपदश्रुतौ लौकिकवैदिकयुक्तात्सिद्धिः शक्तिसिद्धिः । न नित्यत्वं वेदानां कार्यत्वश्रु
तेः कृतकत्वेनानित्यत्वानुमानात् वर्णानुपूर्व्यस्तित्वं सर्वेषां प्रत्यक्षत्वाच्चेति बोध्यं । अनित्य
त्वे पौरुषेयत्वापत्तिमित्याह ॥ न पौरुषेयत्वं तत्कर्तुः पुरुषस्याभावात् ॥४६॥ ईश्वरनिरा
करणादिति भावः । अन्यस्य वक्तृत्वाह्नित्यत आह । मुक्तामुक्तयोरयोग्यत्वात् ॥४७॥ मुक्तस्य निः
संगत्वेनामुक्तस्य धर्माधर्मनभिज्ञत्वेन कर्तृत्वानुपपन्नत्वात् ॥ नापौरुषेयत्वान्नित्यत्वमंकुरादि
वत् ॥४८॥ न ह्यपौरुषेयत्वनित्यत्वयोर्व्याप्तिरस्ति अंकुरादौ व्यभिचारात् । अंकुरादीनामकार्य
त्वात् ॥ सकर्तृकत्व वा दिनां प्रत्याह ॥ तेषामपि तद्योगे दृष्टबाधादिप्रसक्तिः ॥४९॥ तद्यो
गे कर्तृयोगे दृष्टस्याकर्तृकत्वस्य बाधः प्रमादिष्याद्यात् । अदृष्टसकर्तृकत्वकल्पनं कार्यत्वहेतु
स्याप्रयोजक इति भावः । किं तर्हि सकर्तृकं तत्राह ॥ यस्मिन्नदृष्टेपि कृतबुद्धिरुपजायते तत्पौरुषे

बउभाभ्यां रेकांन · त्वं सुखी अहं दुःखी घटोयमित्याद्यबाधितप्रमया एवात्मैकत्वाप्यसमाः ।
संतीति भावः ॥ ननु अद्वैतश्रुतेः का गतिस्तत्राह ॥ अन्यपरत्वमविवेकानां तत्र ॥ ८४ ॥ तत्रात्मैक
श्रुतौ । आत्मैकत्वप्रतिपादिकायामविवेकानां मूढानां अन्यपरत्वं भातीति शेषः तथा च न श्रु
ति विरोध इति भावः । किं चैकात्मवादिनां जगदुपादानकारणमपि नोपपद्यत इत्याह । नात्मा
नाविद्या नोभयं जगदुपादानकारणं निःसंगत्वात् ॥ ८५ ॥ नात्मा कूटस्थत्वात् अविद्या ।
45 संभवतीति चेत् द्वैतापत्तिः असती चेन्न कारणं वंध्यापुत्रवत् । अत एव नोभयमपि । चिदा
नन्दरूप आत्मेति तन्मतं दूषयति नैकस्यानंदचिद्रूपत्वे द्वयोर्भेदात् ॥ ८६ ॥ आनंदः सुखं ।
चित् ज्ञानं तयोर्लोके भेदात् ऽमुक्तौ किं कमिदमिति चेत् प्रमाणाभावे सिद्धेत् । किं च । चित
आनंदरूपत्वे संसारदशायां कुतो नानुभावः । अविद्यातिरोधानादिति चेत् सा अत्र संबद्धा
कथं तिरोदध्यात् । संबद्धा चेत् संगत्वश्रुतिविरोधः किं च मुक्तौ आनंदोनुभूयते न वा । अन्ये
नेनात्मभूयते आत्मनेति चेत् । एकस्य कर्तृकर्मत्व विरोधः न चेत् किमानंदरूपतया ।
अथानंदत्व स्तवेगोविद्वान्नविभेति कुतश्चनेति का गतिस्तत्राह ॥ दुःखनिवृत्तेर्गौणः ॥ ८७ ॥ सा

वचसः परस्परविरोधात् । भ्रममाह ॥ सदसत्ख्यातिर्बाधाबाधात् ॥५६॥ इदं रजतं सदसदात्मकं
नेदं रजतमिति हि रजतस्य बाध्यो न पुरोवर्तिन इति । स्फोटं निराकरोति ॥ प्रतीत्यप्रतीतिभ्यां न स्फो
टात्मकः शब्दः ॥५७॥ प्रतीतिर्वर्णानां । अप्रतीतिः स्फोटस्य वर्णातिरिक्तस्य । तस्मान्न स्फोटः श
ब्दः किंतु वर्णा एव । तेन चानित्यास्त्याह ॥ न शब्दनित्यत्वं कार्यताप्रतीतेः ॥५८॥ उत्पन्नो गकार इ
त्यादिप्रतीतेः । आशंकते ॥ पूर्वसिद्धसत्त्वस्याभिव्यक्तिर्दीपेनेव घटस्य ॥५९॥ यथांधकार
स्थो घटो दीपेनाभिव्यज्यते तथा वर्णाः ध्वनिनाभिव्यज्यंते तदभावान्न संतोऽपि प्रतिभांति । न
त्वसत्वात् दूषयति ॥ सत्कार्यसिद्धांतश्चेत् सिद्धसाधनं ॥६०॥ अभिव्यक्तिमात्रं नित्यत्व
कथनस्य कोऽभिप्रायः किं सत्कार्यत्वं यद्वा इति । किं वा प्रकृतिपुरुषयोरिव नित्यत्वं वर्णानामि
ति । नाद्यः । इष्टापत्तेः । अपरं च न वदंते । एकात्मवादं प्रत्याह ॥ नाद्वैतमात्मनो लिंगात्तद्भेद
प्रतीतेः ॥६१॥ आत्मनोऽद्वैतमेव चेन्न कुतः लिंगात् जन्ममरणादितः आत्मभेदसिद्धेः पूर्वत्रैवं प्रसि
द्धवदुक्तमिहानुसाध्यत इति न पुनरुक्तिः ॥ नानात्मनापि प्रत्यक्षबाधात् ॥६२॥ अनात्मना घ
टादिनापि नात्मन एकत्वं प्रत्यक्षबाधात् । किंच ॥ नोभाभ्यां तेनैव ॥६३॥ तेनैव प्रत्यक्षबाधेन

ना ५

५० ।।७६।। देहपरिमाणत्वे ह्यात्मनो हस्तिशरीरदेहप्रवेशे उपचयापचयावश्यंभावित्वेन सावयवत्वं वाच्यं ततश्चानि-
त्यता स्यादतो व्यापकत्वमात्मन उचितं ।। ततो निष्क्रियत्वादूर्ध्वगमनं न संभवतीति भावः । वैदिकमुक्तिं दूषयति न २
नानाविषयरागोच्छित्तिः क्षणिकत्वादिदोषात् ।।७७।। अनाद्यविषयरागोपरागः संबंधस्तदुच्छित्तिर्न मुक्तिः
पूर्वपूर्वविषयसंबंधोच्छेदस्य सर्वक्षणिकत्वेन संसारेपि सुलभत्वात् । तत्र तु संविन्नाशस्यापि क्षणिक-
त्वात् । आत्मनोपि क्षणिकत्वेन कस्य मुक्तिरित्यादिदोषाच्च । आत्मनः सर्वोच्छेदो मुक्तिरिति मतं दूषयति ।। न
50 सर्वोच्छित्तिरपुरुषार्थत्वादिदोषात् ।।७८।। को हि सर्वस्य परित्यागेन तदुच्छित्तिः प्रार्थनीया स्यात् । असंभ-
वाच्च । एवं शून्यमपि ।।७९।। अपुरुषार्थत्वादिदोषात् असंभवाच्चेत्यर्थः । लोकान्तरदेशे लोकान्तरस्वर्गे चंदनव-
निताद्विलाभ एव मुक्तिरिति दूषयति ।। संयोगाश्च वियोगान्ता इति न देशादिलाभोपि ।।८०।। स्पष्टं ।। भागस्य जीव-
स्य भागिनि ब्रह्मणि योगो मुक्तिरिति दूषयति । न भागियोगो भागस्य ।।८१।। ब्रह्मजीवयोर्भागिभागत्वकल्प-
नायां मानाभावात् ।। योगस्य वियोगान्तत्वाच्च ।। नाणिमादियोगोप्यवश्यंभावित्वात् तदुच्छित्तेरितरयोगवत् ।।८२।।
नेन्द्रादिपदयोगोपि तद्वत् ।।८३।। सूत्रस्यैषा इंद्रियाणि भौतिकानीति निरस्यति । न भूतप्रकृतित्वमिंद्रि-
याणामहंकारत्वश्रुतेः ।।८४।। भूतप्रकृतित्वमित्यत्र बहुव्रीहिस्तत्पुरुषः । सात्त्विकाहंकारकार्यत्वं हि इंद्रि-
याणां श्रूयते । पुराणादिषु भूतप्रकृतित्वमिति लौकिको व्यपदेशस्तु येनेंद्रियाणामहंकारकारणं तस्मा राम

सुखव्यपदेश इति शेषः ॥ प्रकारान्तरमाह ॥ विमुक्तिप्रशंसा मन्दानां ॥६८॥ मन्दानां रजसतामसानां
विमुक्तिप्रशंसा पुरुषार्थप्रोत्साहनमित्यर्थः ॥ मनो वै मनं निराकरोति ॥ न व्यापकत्वं मनसः
करणत्वादिन्द्रियत्वाद्वा वाह्यपदिवच्चक्षुरादिवच्च ॥६९॥ पदं तु शिरसि मे वेदना पादे मे सुखमित्यादि
ज्ञानं मनसो विभुत्वसाधकमाहुस्तद्दाषयति संचारित्वान्मनसः क्रमग्रहणनिमित्तमिति तेन न विभु-
त्वसिद्धिः ॥ सक्रियत्वाद्गतिश्रुतेश्च ॥७०॥ सक्रियत्वादित्येकमानं दर्शितं ॥ गतिश्रुतेरिति सक्रियत्वे
मानं दर्शितं ॥ न निर्भागत्वं तद्योगाद्घटादिवत् ॥७१॥ मनसोऽनाकारणत्वं कारणयोगात् ॥ किमस्य
कारणमिति चेत् अहंकार इति गृहाण ॥ किंच प्रकृतिपुरुषयोरन्यत्सर्वमनित्यं ॥७२॥ प्रकृतेः
कथं नित्यत्वं तत्राह ॥ न भागलाभो भोगिनो निर्भागत्वश्रुतेः ॥७३॥ भागाः कारणानि यस्य कार्यत्वे
न संति तस्य प्रधानस्य न कारणलाभो निर्भागत्वश्रुतेः ॥ मायां तु प्रकृतिं विद्यादिति ॥ सावधारणं
प्रकृतित्वश्रुतेः ॥ प्रधानस्य कारणं न वस्थानात्तु ॥ आनंदाभिव्यक्तिर्मुक्तिरिति मतं दूषयति ॥ नानंदा-
भिव्यक्तिर्मुक्तिर्निर्धर्मकत्वात् ॥७४॥ किमात्मस्वरूपम् आनन्दरूपत्वात् ॥ अन्यच्च संसारदशायां मुक्तिप्रसंगः ॥
अन्यथा कार्यभावस्यावश्यं नाशादनिर्मोक्षापत्तिः ॥ विशेषगुणोच्छेदो मोक्ष इति मतं निरस्यति ॥ न विशेषगुणो-
च्छित्तिस्तद्वत् ॥७५॥ तद्वदिति न मुक्तिरित्यर्थः सामान्यगुणस्यैवाविरुद्धमार्गाभावादिति भावः ॥ देहपरिमाण-
स्यात्मनो देहान्निष्क्रान्तस्य सततोर्ध्वगमनं मुक्तिरिति बाह्यमतं दूषयति ॥ न विशेषगतिर्निष्क्रियस्य ॥

५१ रूपत्वं भावप्रतीतिः ।९३। गोत्वादेः अगोभेदरूपत्वेन कुतः भावप्रतीतिः अगोरूपप्रतियोगिस्मरणं विनैव भाव
रूपतया प्रतीतेः अत एवोक्तं । सिद्धरूपगोरपोह्यता निषेधात्मकस्वभावः । तत्र गोरेव वक्तव्येन भावः
प्रतिषिध्यते । एवं सिद्धे गोत्वगोर्नास्तित्वदभावे च गोः कुत इति । सादृश्यं पदार्थान्तरमिति निरस्यति । न तत्त्वान्तरं सा
दृश्यं प्रत्यक्षोपलब्धेः ।९४। तत्तद्रव्यगुणादिरूपस्यैव प्रत्यक्षेणोपलम्भादित्यर्थः । निजशक्त्यभिव्यक्ति
र्वा वैशिष्ट्यात्तदुपलब्धेः ।९५। निजशक्त्यभिव्यक्तिरिति अभिव्यक्ता निजशक्तिरित्यर्थः अभिव्यक्तात्
१६ तत्कार्यानुकूलतया सिद्धवैशिष्ट्यात् तादृशशक्तिसंबंधात्तदुपलब्धेः सादृश्योपलम्भादित्यर्थः । तथा
52 च तत्त्वपदार्थानिष्पाशक्तिरेव सादृश्यप्रतीतिविषय इति भावः । न संज्ञासंज्ञिसंबंधोपि ।९६। नित्य इ
ति शेषः । किं बहुना आत्मादि[illegible]यो संबंध एवानित्य इत्याह । न संबंधनित्यतोभया
नित्यत्वात् ।९७। स्पष्टं । अजसंबंधं निराकरोति । नाजः संबंधो धर्मिग्राहकमानबाधात् ।९८। विशि
ष्टप्रतीत्या विशेषणविशेष्याधीनसंबंधस्यैव सिद्धेः तस्य च विशेषणविशेष्याभावेऽसंभवात् संबंध
स्याजत्वमयुक्तमिति । समवायं निरस्यति । न समवायोऽस्ति प्रमाणाभावात् ।९९। प्रमाणाभावमेवोपपा
दयति । उभयत्राप्यन्यथासिद्धेर्न प्रत्यक्षमनुमानं वा ।१००। समवाये हि शुक्लो घट इत्यादिप्रत्यक्षं प्रमा
णं विशिष्टप्रतीतिर्विशेषणविशेष्यो न यसंबंधविषया विशिष्टप्रतीतित्वात् दण्डीति प्रतीतिवद् राम

त्रेऽगृह्यते न स्यात् प्रकृतित्वाभिमानकृतः षट्पदार्थास्तत्ज्ञानान्मुक्तिः षोडशपदार्थात् तत्ज्ञानेन मुक्तिरिति वैशेषिके
नैयायिकमते दूषणाय सूत्रे न षट्पदार्थैर्नियमस्तद्बोधान्मुक्तिश्च। ८५। षोडशादिष्वप्येवं। ८६। अणादिशब्दाद
न्येऽपि नियतपदार्था निरस्ताः। नित्यैश्चतुर्विधैः नियतैः परमाणुभिर्जगदारंभ इति दूषयति। नाणुनित्यत्वात्॥
त्कार्यत्वश्रुतेः। ८७। प्रकृतिपुरुषयोरेव नित्यत्वश्रवणेन न रूपसर्वस्यैव कार्यत्वादेव च परमाणुर्न निरवयवः।
त्याह। न निर्भागत्वं कार्यत्वात्। ८८। परमाणूनामिति शेषः। यत्कार्यं तन्न निर्भागं यथा घट इति। उद्भूतरूपनिबं
धनं द्रव्यप्रत्यक्षत्वमिति दूषयति। न रूपनिबंधना प्रत्यक्षतानियमः। ८९। रसादयं पदी तथाकाशस्य प्रत्यक्ष
त्वादिति। अणुमहद्दीर्घह्रस्वमिति चतुर्धा परिमाणमिति दूषयति। न परिमाणचातुर्विध्यं द्वाभ्यां तद्योगात्। ९०।
महदणुभ्यामेव तयोः कार्यकारणयोर्योगात्। अन्योन्यापरिमाणं महदणुभेदत्वेनैवोपपन्नेः। प्रकृतपुरुषा ना६
न्यत्सामान्यं नित्यमिति तद्दूषयति। अनित्यत्वेऽपि स्थिरतायोगात् प्रत्यभिज्ञानं सामान्यस्य। ९१। यथा सोऽयं दे
वदत्त इति न सामान्यविषया प्रत्यभिज्ञा। किंतु व्यक्तिविषया। व्यक्तेः स्थिरत्वात् तथा सामान्यस्यापि स्थिर
त्वात् प्रत्यभिज्ञानं तु नित्यत्वात्। न तदपलापस्तस्मात्। ९२। एतस्मादेव हेतोः तदपलापः सामान्यापलापो न
कार्यः। अबाधितप्रत्यक्षस्य विषयसाधकत्वादिति भावः। अन्यापोहो जातिरिति निरस्यति। नान्यनिवृत्ति

५२ णां प्राप्यकारित्वनियमः चक्षुषस्तेजसत्वेन विषयदेशगमने संभवेपि श्रोत्रादेस्तदभावात् ॥
किंतु शब्द एव वीचीतरंगन्यायेन वा कदंबमुकुलन्यायेन वा श्रोत्रदेशं गतः श्रोत्रेण गृह्यते
गंधोपि साश्रयो घ्राणदेशमागतो घ्राणेन । एवमत्रापि । दूरशब्द इत्यादिप्रतीतिस्तु भ्रांतिरेव
कारणाद्दवि मयि रणो चेत्यादिमतानि निरस्यति । नाप्राप्तप्रकाशकत्वमिंद्रियाणामप्राप्तेः
सर्वप्राप्तेर्वा । अप्राप्तानां विषयासंबंधानां प्रकाशकत्वमिंद्रियाणां न । अप्राप्तेः असंबंधात् । अथवाप्राप्तत्वा
५२ दिन्द्रियाणामस्त्येव संबंधस्तत्राह सर्वप्राप्तेः तथा च जगदुदरवर्त्ति सर्वमेव दृश्यतेः तस्माद्भिन्नदेशेन
संबंध आवश्यक इति भावः । स च वृत्तिरित्याह । प्राप्त्यर्थप्रकाशलिंगाद्वृत्तिसिद्धिः ५ अर्थं वृत्तिस्व
रूपमाह । भागगुणाभ्यां तत्त्वान्तरं वृत्तिः संबंधार्थं सर्पतीति ६ कार्यानुमेयावृत्तिस्तत्त्वान्तरमाह ।
कारिकं न भागो न वा गुणः । अनियतपरिमाणवादिनो हि सांख्याः वा चासंबंधस्य ज्ञानायोगात्सर्पति ।
इति शब्दो यथानुभवकल्पनार्थः । तथा च चक्षुः यदि चक्षुर्विषयपर्यंतं गच्छति तर्हि श्रुतिवेगत्वात्तै
जसं स्यादत आह । न तेजोपसर्पणात्तैजसं चक्षुर्वृत्तितस्तत्सिद्धेः ७ तेजसमिवोपसर्पणात् दूरगमना
न चक्षुः अतयः प्रसं दृपाः स्फुरिता ह्रस्वपत्रच । अदृष्टानुपरतात्र संबद्धार्थावबोधका इति । अ राम

१

नुमानं च उभयत्रापि तादात्म्येनैव सिद्धिः। इह तंतुषु पट इत्यादिप्रतीतिस्तु स्ववासनामात्रकल्पिता
नाधिसाधिका। किंच समवायः संबंधः संबंधिनौ संबंधयेत् असंबद्धो वा। आद्ये तस्यापि संबं
धांतरं वाच्यमित्येवमनवस्था। समवायस्य स्वरूपमेव संबंधश्चेत्। आद्यावेव कुतो न तत्।।
असंबद्धसंबंधत्वं त्वन्याय्यमेवेति देशान्तरसंयोगविभागाभ्यामनुमेयैव क्रिया न प्रत्यक्षा सूर्यक्रि
यावदिति मतं निरस्यति। नानुमेयत्वमेव क्रियायाः नेदिष्ठतद्वतोरेवापरोक्षप्रतीते।१०.२। नेदिष्ठ
स्यातिनिकटवर्त्तिनः तत्तद्वतोः क्रियाक्रियावतोः तथा चानुभवापलापो नोचित इति भावः। सू
र्यक्रियात् दूरस्थत्वान्न प्रत्यक्षा। पंचभूतारब्धं शरीर[मि]ति दूषयति न पांचभौतिकं शरीरं बहू
नामुपादनायोगात्।१०.२। उपादानत्वायोगादित्यर्थः।। किंच शरीरस्य पांचभौतिकत्वे घटाकार
संयोगस्येवाप्रत्यक्षत्वापत्तिः योग्यसमेतस्यैव प्रत्यक्षत्वनियमात् शरीरं द्विविधमित्याह।।
न स्थूलमिति नियमः आतिवाहिकस्यापि विद्यमानत्वात्।१०.३। मनसो निराश्रयस्य गत्यभावाद्दे
हान्तरगमने आश्रयो वाच्यः स एवातिवाहिकं सूक्ष्मं शरीरमित्युच्यते। अंगुष्ठमात्रं पुरुषं निश्च
कर्ष यमो बलादित्यत्र पुरुषपदवाच्यमपि तत् पुरि स्थूलशरीरे शेते इति व्युत्पत्तेः। नेन्द्रिया

५३ वोपगात तस्य स्वरूपस्य स्तरभूतस्य संदेशः पूर्ववत् निमित्तत्वमेत्यर्थः प्राणो वा ध्वरिति मतं निरस्यति। न देहारंभक
स्य प्राणत्वमिन्द्रियशक्तितस्तत्सिद्धेः।२३। देहजनकस्य वायोर्न प्राणत्वं सर्वेन्द्रियशक्तिरूपेण तत्सिद्धेः सामा
न्यकरणवृत्तिः प्राणा इति भावः। भोक्तुरधिष्ठानाद्भोगायतननिर्माणमन्यथा पूतिभावप्रसंगः।२४। योनौ
वीजमारभ्य प्राणादिरधिष्ठानात् संबंधविशेषात्। पूतिभावो दुर्गन्धिता पुरुषस्य भस्मस्यप्रायं प्रधानं तद्द्वारे।
वाधिष्ठानमस्तु न तु स्वातंत्र्येण वीजादौ तत्राह। भृत्यद्वारा स्वाम्यधिष्ठितिर्नैकान्तात्।२५। प्रधानद्वारा
53 पुरुषस्याधिष्ठितिः नैकान्तात् व्यभिचारात् सर्वत्र विद्यमानत्वादिति यावत्। न पूतिभावविरोधिनीति शेषः
पु ८ सुषुप्तिदृष्टान्तेन मोक्षे दुःखाभावं वक्तुमाह। समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपता।२६। ब्रह्मरूपता दुःखासं
वेदनं भेदं विशेषमाह। द्वयोः सवीजत्वमन्यत्र तद्धतिः।२७। सवीजत्वं पुनर्दुःखप्रयोजक संस्कारवत्त्वं।
तद्धतिः संस्काररहितिः मोक्षे प्रमाणमस्तीत्याह द्वयोरिव त्रयस्यापि दृष्टत्वात् तु द्वौ।२८। यथा सुषुप्तिः प्रत्यक्ष न ५
दो ४ सिद्धा यथा वा समाधिरागमसिद्धिः तथा मोक्षोपि शास्त्रसिद्धः तत्रापि द्वौ सुषुप्तिसमाधीनात्यन्तपुरुषा पु ४
र्थो सवीजत्वात् किंतु मोक्ष एव निर्वीजत्वादिति भावः। रागादीनामेव बंधहेतुत्वात् किं संस्कारादरपर्यायवा
सनये त्यत आह वासनयानर्थख्यापनं दोषयोगेपि न निमित्तस्य प्रधानबाधकत्वं।२९। दोषयोगेपि रागा
दियोगेपि वासनयैव अनर्थख्यापनं सौंदर्यज्ञानं कारणमिति शेषः। अतो न रागादेरेव बंधहेतुत्वं

सौंदर्या १ राम

मूर्त्तावृत्तिः कथं स्यादिति तत्राह । न द्रव्यनियमस्तद्योगात् ।८। द्रव्य एव क्रियेति न नियमः किंतु तद्यो
गात् क्रियायोगात् क्रियानियमः यत्र प्रमाणं दृश्यते नात्र क्रियेत्यर्थः वृत्तिक्रियायां च विषयप्रका
शः साध्य इति भावः देशभेदे भौतिकानीन्द्रियाणि भविष्यन्ति यथास्मच्छिवकदृष्टस्य मरणमिति
तत्राह । न देशभेदेऽप्यन्योपादानतास्मदादिवन्नियमः ।९। अन्योपादानता अभूतैपादानकत्व
मिन्द्रियाणामिति शेषः । किंतु अस्मदादिवत् अस्मदादीन्द्रियाणामिव नियम आह कारिका
णीन्द्रियाणीति स्वशरीरव्यापिगृहीता न व्यभिचारः भूमौ व्यज्ञि व्यभिचरेदिति भावः यदि न पं
क.मि.७ चभूतोपादानकं शरीरं तर्हि पांचभौतिकमिति व्यवहारः कथं तत्राह । निमित्तव्यपदेशात् तद्व्यपदेशः ।१०। पंच
भूतनिमित्तव्यपदेशात् तद्व्यपदेशः पांचभौतिकमिति नैमित्तिकव्यपदेशः उपादानत्वेन निर्दिश्यते । नि
मित्ततेति भावः शरीरभेदानाह । ऊष्मजाण्डजजरायुजोद्भिज्जसांकल्पिकसांसिद्धिकं चेति न नियमः ।११।
द्वि सांकल्पिकं मन्वादिशरीरं सांसिद्धिकं मंत्रौषध्यादिसिद्धिजं इति हेतोः चतुर्ध्यैवेति न नियमः सर्वेषु पृथि
व्युपादानमसाधारण्यात् तद्व्यपदेशः पूर्ववत् ।१२। सर्वेषु शरीरेषु पार्थिवमित्यसाधारण्यव्यपदेशात् सू ४२
र्यादिलोकस्य तैजसादिशरीरेऽपि पार्थिवावयवानामवयवत्वमेव तेजआदेः उपभोगे पार्थिवावयवानामे

५६ कर्मिणामुभयदेहः चतुर्थदेहमाह । न किंचिदप्यनुशयिनः ।२६। अनुशयः प्रारब्धकर्मशेषः सोऽस्यास्तीत्यनु
शयी तस्य ज्ञानिन इत्यर्थः न किंचिदपि कर्मातिशेषः ज्ञानी प्रारब्धशेषं भुंजानो न विधिनिषेधेष्वधि
क्रियत इति भावः जीवसंबन्धिन्यो ज्ञानेच्छाकृतयो यद्यपि नित्यास्तथापि च चिन्नित्या भविष्यन्तीत्य
त आह । न बुद्ध्यादिनित्यत्वमाश्रयविशेषेपि वह्निवत् ।२७। यद्यपि आश्रयविशेषः सत्यलितमा
पि ज्ञानादयो नित्या एव तत्रस्थः स्वकीयज्ञानादिभ्यो भिन्नत्वात् । मणिमंत्रौषधितपःप्रभावजसिद्ध
यो दृष्टा ननु योगसिद्धयस्तत्राह । योगसिद्धयोप्यौषधादिसिद्धिवन्नापलपनीयाः ।२८। अणिमा
54 दिसिद्धिकार्यव्यूहपरपुरप्रवेशादयो दृष्टास्ते च मंत्रादिभ्यः तद्वत्सिद्धिप्रदेभ्योऽसंभवन्तो योगम
वावलंबत इति भावः । पृथक् भूतानां चैतन्यादर्शनेपि देहाकारपरिणतेषु तेषु स्यादित्यत आह ॥ न
भूतचैतन्यं प्रत्येकादृष्टेः सांहत्येपि च सांहत्येपि च ।३०। यत्र हि प्रत्येकं त्वल्पा शक्तिर्दृश्यते भवति त
त्र संघाते धिका शक्तिः यथा तंतूनां स्वल्पशक्तिमतां समुदायाज्जालबंधनशक्तिः न च तथा भूतानां
पृथक् चैतन्यं दृष्टं येन सांहत्ये चैतन्योद्भवः स्यात् उक्तो यथार्थो व्यवहित इति पुनः स्मारितः वीप्सा
अध्यायसमाप्त्यर्था ॥ इति श्रीवेदान्तिमहादेवकृते सांख्यप्रवचनवृत्तिसारे पंचमोध्यायः ॥ ५ ॥ अथ
षष्ठाध्यायः तत्र प्रायशः पूर्वोक्त एवार्थ उपसंह्रियते सूत्राण्यपि प्रायशः स्पष्टानि किंचिद्व्या राम

किंतु निमित्तस्य रागादेरपि निमित्तस्य वासनाया: प्रधानवाधकत्वं मोक्षवाधकत्वं तस्माद्वासनोच्छेद एव
यतितव्यमिति भाव: । रागादिद्वेषैर्वेगाख्यसंस्कारात् क्रियाक्रिया तश्च संस्कारस्ततो निरस्य
ति । एव: संस्कार: क्रियानिवर्त्तको न तु प्रतिक्रियं संस्कारभेद: बहुकल्पनाप्रसंगात् २० स्पष्टं । नन्वेक
स्मात्संस्कारादेका क्रिया तत: संस्कार इति लोके बुद्धिरस्ति तत्राह । नवा भव बुद्धिनियम: २१ एकस्मा
देव बहु: क्रिया: इत्यपि बुद्धिरस्ति तस्माल्लाघवादेक एव संस्कार: । जंगमशरीरमन्यत् स्थावरे तिदि
शति । वृक्षगुल्मलतौषधिवनस्पतितृणवीरुधादीनामपि भोक्तृभोगायतनत्वं पूर्ववत् । २२ वीरु
त्प्रतानवल्लप्रसारिणी लता । ॥ अत्र प्रमाणमाह । स्मृतेश्च २३ । अभिवादितश्चबपोविद्व: अप्रतिषेधनत्व
यश्छतिश्मशाने जायेत वृक्षो गृध्रकंकनिषेवित: शरीरजै: कर्मदोषैर्याति स्थावरतां नर: । वाचिकै:
पक्षिमृगतां मानसैरन्त्यजातितामित्यादिस्मृतेस्तेषामपि शरीरित्वावगमात् । वृक्षादीनां शरीरित्वे
कर्माधिकारापत्तिं निरस्यति नदेहमात्रत: कर्माधिकारित्वं वैशिष्ट्यश्रुते: २४ । अर्थी समर्थो विद्वा
नपर्युदस्तोऽधिकारीति भाव: । देहभेदमाह । विधात्रधाराणां व्यवस्था कर्मदेहोपभोगदेहोभ
यदेहा: २५ । वीतरागाणां फलसंन्यासेन कर्म कुर्वतां कर्मदेह: पश्वादीनामुपभोगदेह: भोगिनां

सां.वृ.

५५ आपतेत् स च श्रुतिविरुद्धः। नन्वसंगत्वे पुरुषस्य धर्मो स्वर्गोऽधर्मो नरक इति कथं तत्राह। पारंप

र्येपि तत्सिद्धिरविवेकात्।११। प्रकृतिधर्मत्वेपि प्रकृतिपुरुषाविवेकात् छायापत्त्यात्मनः स्वर्गा

दिप्राप्तिरित्यभिमानः। अनादिरविवेको न्यथा दोषद्वयप्रसक्तेः।१२। यदि सादिरविवेको भवेत्त

र्हि तदुत्पत्तेः पूर्वं मोक्षः स्यात् तदुत्पत्तौ च बंध इति मुक्तस्य पुनर्बंधापत्तिरेको दोषः। अविवेका

भावस्यापि विद्यमानत्वान्मुक्तसिद्धौ अविवेकनाशार्थं यत्नो निरर्थकः स्यादिति द्वितीयो दोषः।

न नित्यः स्यादात्मवदन्यथानुच्छित्तिः।१३। आत्मवत्कूटस्थनित्यः नापि प्रकृतिवत् परिणामि

नित्यः अन्यथा नित्यत्वेनुच्छित्तिः स्यात्। प्रतिनियतकारणनाश्यत्वमस्य ध्वांतवत्।१४। य

55 था ध्वांतस्य नाशकः प्रकाश एवमस्य। अविवेकनाशकमाह। अत्रापि प्रतिनियमोन्वयव्य

तिरेकात्।१५। विवेकख्यातिरिति शेषः। प्रकारान्तरासंभवादविवेक एव बंधः।१६। बंधः संसा

रोऽविवेक एवेति कार्यकारणयोरभेदोपचारात्। धर्मादिकं तु सहकारीति भावः। मुक्तेः कार्यत्वान्नाशमाशंक्या

ह। न मुक्तस्य पुनर्बंधयोगोप्यनावृत्तिश्रुतेः।१७। अपिशब्दाद्विवेकख्यात्या मुक्तिः समुच्चीयते। उभयत्रापि अ

नावृत्तिश्रुतेः आत्मा ज्ञातव्यः प्रकृतितो विवेक्तव्यो न स पुनरावर्त्तते इत्यादिः। भावकार्यस्यैव नाशस्य नियम इति भा

वः। विपक्षे दोषमाह। अन्यथा पुरुषार्थत्वे।१८। सुषुप्तिसमाधितुल्यत्वात्। एतदेव स्पष्टयति अविशेषापत्ति

रुभयोः।१९। उभयोः संस्कारमुक्त्योः। मुक्तौ अन्तरायाणां ध्वंसमात्रं धर्मान्तरप्राप्तिर्वा तत्राह मुक्तिरन्त राम

५५

ख्यापयन्ते॰ अस्त्यात्मा नास्तित्वसाधनाभावात् ।१। देहादिव्यतिरिक्तो वैचित्र्यात् ।२। षष्ठीव्यपदे
शादपि ।३। मम देह इति ज्ञानपूर्वकात् शब्दाभिलापादित्यर्थः। न शिलापुत्रकवद्धर्मिग्राह
मानबाधात् ।४। शिलापुत्रकस्य शरीरमितिवन्न भेदव्यपदेशो गौणः किंतु मुख्यः धर्मि
ण आत्मनो ग्राहकेण शरीरादिभेदग्राहकेण मानेन प्रबलप्रत्यक्षानुमानशब्दरूपेण गौण
त्वस्य बाधात्। शिलापुत्रकस्य शरीरमित्यत्र तु प्रत्यक्षेणैव भेदग्रहात् ॥ कृशोहमित्यादिस्तु
८६ भ्रमरूपात्तादात्म्याभिमान इति भावः ॥ अत्यन्तदुःखनिवृत्त्या कृतकृत्यता ।५। न तु सुखोपलब्ध्या तत्तस्य द्वे
षित्वात्। यथा दुःखात् द्वेषः पुरुषस्य न तथा सुखादभिलाषः ।६। यथा सुखेपि दुःखान दुःखावश्यंभावात्
द्वेषः तथा दुःखेपि सुखात् अल्पात् लभ्यमानात् अभिलाषो न सुखं हि विकुलतरदुःखमिश्रितमि
ति न सुखाभिलाष इति भावः। ननु कस्य चिद्दुःखमिश्रितमपि सुखं भवत्वित्यत आह कुत्रा न ६
पि कोपि सुखीति ।७। दुःखमिश्रितेति सुखत्वस्यादिः। नन्वस्तु दुःखमिश्रणात्सुखं तु काम्यं भवेदत
आह। तदपि दुःखशबलमिति दुःखपक्षे निक्षिपन्ते विवेचकाः ।८। खर्जाद्यर्थीजन इव भयदुः
खमस्त्येवेति भावः। सुखस्यैव पुरुषार्थत्वं लोके दृष्टं न दुःखाभावस्येत्यत आह। सुखलाभाभावाद्
पुरुषार्थत्वमिति चेन्न द्वैविध्यात् ।९। रागिणां सुखं पुमर्थः वीतरागाणां पुनर्दुःखाभाव एव.
निर्गुणत्वमात्मनोऽसंगत्वादिश्रुतेः ।१०। विशेषगुणोच्छित्तिर्मुक्तिरिति पक्षे सामान्यगुणस्वीकार

सां०व० तन्निरोधो विषयोपरागनिरोधः। आदिशब्दात्समाधिः ध्यानादीनामवधिमाह॥ लयविक्षेपयोर्व्यावृत्त्ये
५६ त्याचार्याः॥३०॥ लयः सुषुप्तिः विक्षेपः स्वप्नजागरिते। अवस्थात्रयव्यावृत्तिपर्यन्तं ध्यानादीन्यनुष्ठेयानि तत्र
च स्थाननियमो नास्तीत्याह। न स्थाननियमश्चित्तप्रसादात्।३१ यत्रैव चित्तप्रसादस्तत्र ध्यानाद्यनुष्ठेयं
न नदीपुलिनादिनियमः॥ प्रकृतेराद्योपादानतान्येषां कार्यत्वश्रुतेः।३२। अन्येषां महदादीनां॥ नित्यत्वेपि ना
त्मनो योग्यत्वाभावात्॥३३॥ नात्मन उपादानता गुणवत्त्वसंसर्गित्वाभावादित्यर्थः। आत्मानः स्वतएव
कर्त्तृत्वभोक्तृत्वे किं प्रकृत्युपरागेणेति दूषयति। श्रुतिविरोधान्न कुतर्कापसदस्यात्मलाभः॥३४॥ कु
56 तर्कयुक्तो अपसदः दुष्टाः सभा तत्र आत्मज्ञानं न युक्तं श्रुतिविरोधात् स्वतः कर्त्तृत्वादावपि निर्मो
क्षप्रसंगाच्च। आत्मा कर्त्रादिरूपश्चेन्मा कांक्षीस्तर्हि मुक्ततां। न हि स्वभावो भावानां व्यावर्त्तेतौष्ण्यव
५६ द्रवेरित्युक्तेः। पारंपर्येपि प्रधानानुवृत्तिरणुवत्॥३५॥ यथा घटादेर्मृत्पिंडकार्यत्वेपि पारंपर्येण प
रमाणूनामुपादानत्वं तथा प्रधानस्येत्यर्थः॥ सर्वत्र कार्यदर्शनाद्विभुत्वं।३६। प्रधानस्येति शेषः। विप
क्षे बाधकमाह॥ गतियोगेप्याद्यकारणताहानिरणुवत्॥३७॥ गतिः क्रिया तद्योगे विभुत्वयोगे अणू ज ४
नामिव कार्यता स्यात्॥ अणूनां कार्यत्वं च पराक्रान्तमन्यत्र। प्रसिद्धाधिक्यं प्रधानस्य न नियमः।३८॥ प्र
सिद्धाधिक्यं दृश्यते अस्माकं पृथिव्यादीनि द्रव्याणि त्यादिर्न नियमः। सत्त्वादयो न प्रकृतिधर्माः। किं
तु सत्त्वरजस्तमोरूपैव प्रकृतिरित्याह॥ सत्त्वादीनामतद्धर्मत्वं तद्रूपत्वात्।३९॥ सत्त्वादीनां सत्त्वर

राम०
५६

तपश्चात्तिर्नपरः २०। अज्ञानध्वंस एव मुक्तो न परः धर्म इति शेषः धर्मान्तरपदेकूटस्थत्वव्याहतिरिति भावः
अज्ञानापास्तुपतञ्जलिनोक्ताः। व्याधिः स्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वा
नवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः इति व्याधिर्ज्वरादिः स्त्यानमकर्मण्यता। संशय उभयकोटिस्पृक्
ज्ञानं प्रमादः समाध्यभावनं चध्यानं। आलस्यं कायबुद्धिगुरुत्वं। अविरतिर्विषयतृष्णा भ्रान्तिदर्शनं मिथ्या
ज्ञानं। अलब्धभूमिकत्वं समाधिभूमेरलाभः। अनवस्थितत्वं लब्धभूमौ मनसि मनश्शिल्वा धर्मान्तरयोऽ
पि योऽठवादेनाह। तत्राप्यविरोधः २१ अनावृत्तिश्रुतेरिति भावः श्रवणमनननिदिध्यासनानि सर्वकर्मा
पि योऽठवादेनाह। तत्राधिमा
त्रीतिन नियम इत्याह अधिकारित्रैविध्यान्न नियमः। २२ मृदुमध्याधिमात्रा अधिकारिणः। तत्राधिमा
त्रस्य श्रवणमात्रान्मुक्तिः। मध्यमस्य द्वाभ्यां मन्दस्य त्रिभिः। एतद्वेदोपपादयति। दार्ढ्यमुत्तरेषां २३। उत्तरेषां
मन्दानां मनननिदिध्यासने इति शेषः। स्थिरसुखमासनमिति न नियमः। २४। इतोरेतोः स्वस्तिकादी
नां न नियमः समाधि लक्षणमाह। ध्यानं निर्विषयं मनः। २५। ध्यानं समाधिः सुषुप्तिः समा
धेर्विशेषमाह। उभयथाप्यविशेषश्चेन्नोभयमुपरागनिरोधाद्विशेषः। २६। वृत्तिनिरोधरूपो भवत्तु
त्पत्तिविषयसमाधौ उपरागाख्यविषयवासनानिरोधाद्विशेषः। निःसंगोप्युपरागोऽविवेकात्। २७। स्य
पे० कीदृगुपराग इत्याह। जपास्फटिकयोरिव नोपरागः किं त्वभिमानः। २८। तयोर्हि संसर्गादुपरागोऽप्य
त्वः आत्मनस्त्वसंस र्गान्नोपरागः किं त्वभिमानः। ध्यानधारणाभ्यासवैराग्यादिभिस्तन्निरोधः। २९।

५६ मविरोधात्·प्रकाशतस्तत्सिद्धौ कर्मकर्तृविरोधः।४९। अद्वैतंकथंसिद्धं (मना) दनात्मनैवानाद्यः
जडत्वात्।अन्येप्रकाश्यत्वात्प्रकाशरूपयोर्विरोधः। जडव्यावृत्तोजडंप्रकाशयतिचिद्रूपः।५०॥ डुं२
जडव्यावृत्तत्वमेवचिद्रूपत्वंनतुप्रकाशधर्मत्वं।।अतएवनेतिनेतीत्युच्यतेनविधिमुखे
ना।एवमानंदताप्यनानंदव्यावृत्तिरेव।ननुभावरूपंसुखं·अज्ञायमानसुखस्यदर्शनेनज्ञात्रा
दीनाभावरूपकल्पेनमुक्तावपिद्वैतापत्तेः:अलौकिकेसुखंमुक्तौस्वप्रकाशंचतदित्यत्रमानाभा
शोधो ६ वः:नन्वानंदरूपत्वेश्रुतिवि[illegible]नेत्याह।नश्रुतिविरोधोरागिणांवैराग्यायतत्सिद्धेः।५१।रा
गिणांहिसुखेरागः:मुक्तौचविरागः:ततश्चविषयवैराग्यायात्मनोनानंदस्यापितत्सिद्धेरानंदत्व
57 कथनात्·श्रुतावितिशेषः:वस्तुतआनंदश्रुतिर्दुःखाभावेऔपचारिकीतिभावः:जगत्सत्यत्वमाह
जगत्सत्यत्वमदुष्टकारणजन्यत्वाद्बाधकाभावात्।।५२।दुष्टकारणजन्यंहिपीतःशंखइत्या
दिज्ञानंनपीतःशंखइत्यादिज्ञानबाधकंच·तद्विपर्ययोसत्वःजगतिनतथेतिभावः:प्रकारान्त
रासंभवात्सदुत्पत्तिः।।५३।।प्रकारान्तरंचपूर्वमेवनिरस्तं।अहंकारःकर्त्तानपुरुषः:।५४।अहंका
रबुद्धिः:ननुसत्यामपिविवेकख्यातौसुखादिभोगोदृश्यतेसकथंतत्राह।चिदवसानाभुक्ति
स्तत्कर्मार्जितत्वात्।यथाचित्देहादिज्ञानमवसानमवधिर्यस्याःसावदेहादिमानंतावत्। रम·

जत्तमसांतद्रूपत्वात् तत्तादात्म्यात् निःप्रयोजनप्रवृत्त्यभ्युपगमे मोक्षानुपपत्तेः॥ अननुपभोगेऽपि
पुमर्थं सृष्टिः प्रधानस्योष्ट्रकुंकुमवहनवत्॥४०॥ कर्मवैचित्र्यात्सृष्टिवैचित्र्यं॥४१॥ स्पष्टं॥ सा
म्यवैषम्याभ्यां कार्यद्वयं॥४२॥ प्रकृतेः सदृशपरिणामात्॥ प्रलयः महदादिभावेन विसदृश
परिणामात्सृष्टिः॥ विमुक्तबोधान्न सृष्टिः प्रधानस्य लोकवत्॥४३॥ विमुक्तबोधात् विमुक्तो
पमितिबोधादिव मुक्तं प्रति प्रधानस्य न सृष्टिः॥ प्रवृत्तिः लोकवत्॥ लोके हि कश्चित्कस्यचि
द्बन्धमोक्षार्थं यतते जाते च मोक्षे उदास्ते॥ तथा प्रधाने॥ नान्योपसर्पणेऽपि मुक्तोपभोगो निमि
त्ताभावात्॥४४॥ अन्यस्य बद्धस्य पुरुषस्योपसर्पणेऽपि तदर्थं सृष्टिप्रवृत्तावपि निमित्ताभावात्
अविवेकाभावात्॥ पुरुषबहुत्वं व्यवस्थातः॥४५॥ स्पष्टं। उपाधिश्चेत्तत्सिद्धौ पुनर्द्वैतं॥४६॥
तत्सिद्धौ भेदसिद्धौ॥ द्वाभ्यामपि प्रमाणविरोधः॥४७॥ द्वाभ्यां सत्यत्वासत्यत्वाभ्यां उपाधेः सत्यत्वे
द्वैतबोधकप्रमाणविरोधः॥ उपाधेरसत्यत्वे तु तस्य भेदाव्यवस्थापकत्वेन भेदः स हि बौद्धादिवि स ४
रोधः स्वमतेनाह। द्वाभ्यामप्यविरोधान्न पूर्वमुत्तरं च साधकाभावात्॥४८॥ पूर्वमात्मैकत्वं उ
त्तर उपाधिभेदान्नानात्वं च न उभयत्रापि साधकाभावात्॥ किन्तु सत एव सत्य आत्मभेदः आत्मैक्यप
रा श्रुतिः आत्मैकत्वविषया॥ भेदप्रमदं तु अनौपाधिकसत्यभेदविषयमिति श्रुतिप्रमाणाभ्यां

किंत्वदृष्टद्वारा इति चेत् न असंबद्धस्यादृष्टस्य तदसंभवात् कारणत्वासंभवात् । अयमर्थः
अवश्यमदृष्टस्य तत्र संबंधो वाच्यः स च स्वाश्रयसंयोगविशेषादिरूप एवेति जलादिवद्
ति दृष्टान्तः यथा जलादि अंकुरजननक्षमपि बीजासंबंधमंकुरं न जनयतीति तद्वत् । नि
र्गुणत्वान्न तदसंभवादहंकारधर्मा ह्येते ॥६२॥ निर्गुणत्वादात्मनः तदसंभवात् तस्मिन्नसं
भवात् एते धर्मा इच्छादयोऽहंकारधर्माः कार्यकारणयोरभेदाद् बुद्धिधर्मा एवाहंकारधर्मा इ
त्युक्तं ॥ विशिष्टस्य जीवत्वमन्वयव्यतिरेकात् ॥६३॥ जीवत्वं कर्तृत्वं भोक्तृत्वं विशिष्ट
स्य देहादिविशिष्टस्य न तु स्वरूपेण कौटस्थ्यहानेः अन्वयव्यतिरेकाभ्यां च देहाभिमानस्य कर्तृत्वो
पलंभात् ॥ अहंकारकर्त्रधीना कार्यसिद्धिर्नेश्वराधीना प्रमाणाभावात् ॥६४॥ प्रकृतेर्महान् महतोऽहंका
र इत्युक्तोऽहंकारस्तदभिन्नो यः कर्ता तदधीना कार्यस्य तन्मात्रादेः सिद्धिः नेश्वराधीना कार्यत्वस्य चेत
नकार्यत्वव्याप्यत्वे प्रमाणाभावात् एतदेव स्पष्टयति ॥ अदृष्टोद्भूतिवत्समानत्वं ॥६५॥ न दृष्टः कर्ता
यस्य क्षित्यंकुरादेस्तस्योद्भूतिरुत्पत्तिस्तस्यामिव समानत्वं चेतनकर्त्रभावस्य क्षित्यंकुरादौ हि न चेतन
कर्तास्ति अनुपलब्धेः तथा तन्मात्रेष्वपि महतोऽन्यत् ॥६६॥ अहंकारकार्यं महतोऽन्यत् । न हि स्वकारणं
स्वकार्यं भवति ॥ कर्मनिमित्तः प्रकृतेः स्वस्वामिभावोऽप्यनादिर्बीजांकुरवत् ॥६७॥ पुरुषस्येति पूरणं ।

58

भोग इत्यर्थः तदिति प्रारब्धमुच्यते [illegible] । बुद्धिस्थत्वात् । तस्य तावच्चिरं याव
न्न विमोक्ष्ये अथ संपत्स्ये इत्यादिश्रुतेः ज्ञानिनापि प्रारब्धकर्मफलभोग आवश्यक इति
भावः चन्द्रादिलोके प्राप्तिनिवृत्तसंभवात् । पद्धानिमित्तमविवेकादिर्लोकस्य नोपदे
शात्सिद्धिः पूर्ववत् ५७ । लोकस्य मंदाधिकारिणः उपदेशात् श्रवणमात्रात् न मुक्तिः
किंतु पूर्वं यथोक्तं तथैव तद्बोध्यं । मनननिदिध्यासने प्रपोद्दिते इत्यर्थः । तर्हि श्रुत्वा मु
च्यते इति कथमुपपद्यते तत्राह ॥ पारंपर्यात्तत्सिद्धेर्विमुक्तश्रुतिः ५८ ॥ तत्सिद्धेः श्रवण
मात्रसिद्धेर्विमुक्तश्रुतिः पारंपर्यात् उत्तमाधिकारविषया वा । गतिश्रुतेश्च व्यापकत्वे ।
प्युपाधियोगाद्देशकाललाभो वा भवत् । ५९ । व्यापकत्वेप्यात्मनः उपाधियोगा
द्देहादियोगात् भोगदेशकालयोगः यथाकाशं घटादेर्गमनप्रति गच्छतीव तथात्मापि देहा
वच्छिन्नो गच्छतीव तिविशिष्टदेशकालसंबंधरूप भोगभाक् भवति ॥ कुतो गतिश्रुतेः ।
ऊर्ध्वं गच्छन्ति सत्त्वस्था इत्यादेः अनधिष्ठितस्य प्रतिभावप्रसंगान्न तत्सिद्धिः । ६० । न तत्सि
द्धिः नानधिष्ठानसिद्धिः प्रधानस्य स्वादेव प्रतिभावेन न विद्यतीत्यत आह ॥ मूढवदा
चेदं सर्वदृष्टमात्रतं भवानुलनादिवदंकुरे ॥ ६१ ॥ जीवावस्था प्रारंभ आत्मानाधितिष्ठति ।

सा॰ सू॰ ६२

५९ यस्य वशमन्वयत् । अविवेकनिमित्तोवापंचशिखः ॥ ६८ ॥ अविवेकनिमित्तइति बहुव्रीहिः । एकदेशिमतमा
ह ॥ लिंगशरीरनिमित्तकइति सनंदनाचार्यः ॥ ६९ ॥ यावत्स्थूलशरीरे सूक्ष्मशरीरमस्ति तावत्प्रकृ
भाव ३ ति पुरुषयोः स्वस्वामिसंबंधइति । स्वमतमाह ॥ यद्वातद्वातदुच्छित्तिः पुरुषार्थस्तदुच्छित्तिः पुरुषा
र्थः ॥ ७० ॥ यत्तत्तदित्यव्ययहेतौ । यतस्ततः स्वस्वामिभावोस्तु प्रकृतिपुरुषयोः तस्यतु बंधहेतुत्वा
त् । तदुच्छित्तिः पुरुषार्थः इति मम मतं वीप्सा अध्यायसमाप्त्यर्था ॥ इति वेदान्तिमहादेवकृते
सांख्यप्रवचनसूत्रवृत्तिसारे तंत्राध्यायः षष्ठः । सूत्रसंख्या ॥ ५२७ ॥ श्रीचैतन्यस्वरूपायनमो
59 स्तु ते । श्रीकपिलायनमः ॥ अष्टौ प्रकृतयः ॥ १ ॥ षोडशविकाराः ॥ २ ॥ पुरुषः ॥ ३ ॥ त्रैगुण्यसंचा
रः ॥ ४ ॥ प्रतिसंचरः ॥ ५ ॥ अध्यात्मं ॥ ६ ॥ अधिभूतं ॥ ७ ॥ अधिदैवं ॥ ८ ॥ पंचाभिबुद्धयः ॥ ९ ॥ पंचक
र्मयोनयः ॥ १० ॥ पंचवायवः ॥ ११ ॥ पंचकर्मात्मानः ॥ १२ ॥ पंचपर्वाविद्या ॥ १३ ॥
अष्टाविंशतिधाशक्तिः ॥ १४ ॥ नवधातुष्टिः ॥ १५ ॥ अष्टधासिद्धिः ॥ १६ ॥ दशमूलिकार्थाः ॥ १७ ॥ अनु
ग्रहसर्गः ॥ १८ ॥ चतुर्दशविधो भूतसर्गः ॥ १९ ॥ त्रिविधो बंधः ॥ २० ॥ त्रिविधो मोक्षः ॥ २१ ॥ त्रिविधं प्रमाणं ॥ २२
इति सांख्यसूत्राणि कपिलप्रणीतानि च ॥ इति सांख्यसूत्रं लिखितं भाद्रपदसुदि एकादशि चंद्रवार ।

८२

वृत्तिः

60

सांख्यसूत्र पत्र ५६

कपिलदेवप्रणीतानि
सांख्यसूत्राणि